# कृतिका

¼lLdrL; dfUndikB;Øe ,dkn'kd{kk; ikB;iLrde½
¼çFke% Hkkx%½



dUnh; ek/;fed f'k{kk ckM
fnYyh

प्रथमः पाठः

# मम मित्रं भवन्तु

अद्यत्वे समाजे वयं द्वेषपूर्णं कलहपूर्णं च वातावरणं पश्यामः। प्रायः लोभाकृष्टाः जनाः लोकविरुद्धम् आचरन्ति। समाजस्य सुखाय लोभः न कर्तव्यः। अस्माभिः परस्परं मैत्रीभावेन व्यवहर्तव्यम्। सर्वा प्रकृतिः अपि मानवेभ्यः कल्याणमयं सन्देशं यच्छति। अस्मिन् पाठे वयम् इमं सन्देशम् एव पठिष्यामः।



1. *शं नः सूर्य उरुचक्षा उदेतु,*
*शं नश्चतस्रः प्रदिशो भवन्तु।*
*शं नः पर्वता ध्रुवयो भवन्तु,*
*शं नः सिन्धवः शमु सन्त्वापः ॥* (ऋग्वेद 7/35/8)

**सन्धिच्छेदः**

शम् नः सूर्यः उरुचक्षाः उदेतु। शम् नः चतस्रः प्रदिशः भवन्तु।
शम् नः पर्वताः ध्रुवयः भवन्तु। शम् नः सिन्धवः शम् उ सन्तु आपः।।

**पदान्वयः**

उरुचक्षाः सूर्यः नः शम् उदेतु। चतस्रः प्रदिशः नः शम् भवन्तु।
ध्रुवयः पर्वताः नः शम् भवन्तु। सिन्धवः नः शम् । उ आपः शम् सन्तु।।

**शब्दार्थाः**

| | | |
|---|---|---|
| शम् | = | कल्याणम् |
| उरुचक्षाः | = | अतिप्रकाशवान् |
| ध्रुवयः | = | दृढाः, दृढतया स्थिताः |
| सिन्धवः | = | सरितः, सागराः च |
| उ | = | अथ, च |
| आपः | = | जलानि |

**भावार्थ :**

सूर्यस्य उदयः सर्वेषां कल्याणाय भवेत्। पूर्व-पश्चिम-उत्तर-दक्षिणाः इति चतस्रः दिशः, दृढतया स्थिताः पर्वताः, सरितः सागराः अन्यानि जलानि च सर्वेषां कल्याणं कुर्वन्तु। सर्वा प्रकृतिः सर्वेषां कृते शुभदायिका भवेत्।

2. ***मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।***
***मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे ।***
***मित्रस्य चक्षुषा वयं सर्वाणि भूतानि समीक्षामहे।।*** (यजुर्वेदः 36/10/18)

**सन्धिच्छेदः**

मित्रस्य + अहम्

### *पदान्वयः*

सर्वाणि भूतानि मा (माम्) मित्रस्य चक्षुषा समीक्षन्ताम्। अहम् मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षे। वयम् मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षामहे।।

### *शब्दार्थाः*

| | | |
|---|---|---|
| भूतानि | = | प्राणिनः, जीवाः |
| मा | = | माम् |
| चक्षुषा | = | नेत्रेण, दृष्ट्या |
| समीक्षन्ताम् | = | पश्यन्तु |
| समीक्षे | = | पश्यामि |
| समीक्षामहे | = | पश्येम |

### *भावार्थः*

सर्वे प्राणिनः मम मित्राणि सन्ति। मित्रता सुखदायिनी भवति। यस्मिन् परिवारे समाजे वा परस्परं स्नेहः विश्वासः च भवतः तत्र आनन्दमयं वातावरणं भवति। जनेषु मैत्रीसम्बन्धः विकासं प्राप्नोतु। सर्वे जनाः सर्वान् प्राणिनः मित्रवत् पश्यन्तु। अहम् अपि सर्वान् मित्रताभावेन पश्यामि। वयं सर्वे अपि सर्वान् मैत्रीभावेन पश्येम।

3. ***अभयं मित्रादभयममित्राद्,***
***अभयं ज्ञातादभयं पुरो यः।***
***अभयं नक्तमभयं दिवा नः,***
***सर्वा आशा मम मित्रं भवन्तु।।*** (अथर्ववेद 19/15/6)

### *सन्धिच्छेदः*

अभयम् मित्रात् अभयम् अमित्रात्। अभयम् ज्ञातात् अभयम् परोक्षात्।

अभयम् नक्तम् अभयम् दिवा नः। सर्वाः आशाः मम मित्रम् भवन्तु।।

### पदान्वयः

मित्रात् नः अभयम्, अमित्रात् अभयम्, ज्ञातात् अभयम्, परोक्षात् अभयम्, नक्तम् अभयम्, दिवा अभयम्। सर्वाः आशाः मम मित्रम् भवन्तु।

### शब्दार्थाः

| | | |
|---|---|---|
| नः | = | अस्मभ्यम् |
| अभयम् | = | निर्भयता |
| अमित्रात् | = | शत्रोः, यत् मित्रं न अस्ति तस्मात् |
| ज्ञातात् | = | परिचितात् जनात् |
| परोक्षात् | = | अपरिचितात्, अज्ञातात् जनात् |
| नक्तम् | = | रात्रौ |
| दिवा | = | दिने |
| आशाः | = | दिशः |

### भावार्थः

अस्माकं जीवनं भयरहितं भवेत्। कोऽपि मित्रात्, शत्रोः, परिचितात् अपरिचितात् वा मनुष्यात् केभ्यश्चित् वा भययुक्तः न भवेत्। वयम् दिने वा रात्रौ वा सर्वे भयरहिताः भवेम। मित्रभूताः सर्वाः दिशः अस्मान् सुखयन्तु।

4. ***ईशावास्यमिदं सर्वं***
***यत्किञ्च जगत्यां जगत्।***
***तेन त्यक्तेन भुञ्जीथाः***
***मा गृधः कस्यस्विद् धनम्॥*** (यजुर्वेदः 40/1)

### संयोगः

वास्यम् + इदम् ।

**सन्धिच्छेदः**

किम् + च ।

**पदान्वयः**

जगत्याम् यत् किम् च जगत् ईशा वास्यम्। तेन त्यक्तेन भुञ्जीथाः, कस्यस्विद् धनम् मा गृधः।

**शब्दार्थाः**

| | | |
|---|---|---|
| ईशा | = | ईश्वरेण |
| वास्यम् | = | आच्छादितम्, व्याप्तम् |
| जगत्याम् | = | संसारे |
| जगत् | = | परिवर्तनशीलं, गतिशीलम् चरम् अचरं वा। |
| भुञ्जीथाः | = | उपभोगं कुरु |
| मा गृधः | = | लोभं मा कुरु |
| कस्यस्विद् | = | कस्यचित् |

**भावार्थः**

संसारे भौतिकपदार्थाः प्राणिनाम् एव उपभोगाय सन्ति परन्तु सर्वेषां वस्तूनाम् उपभोगः आसक्तिं विना एव कर्त्तव्यः। अन्येषां जनानां धनादिकां सम्पत्तिं प्रति लोभः न करणीयः ।

## अनुप्रयोगः

1. **अधोलिखितानां पदानां शुद्धोच्चारणं कृत्वा तेषाम् अनुलेखनम् क्रियताम् -**

   क. समीक्षन्ताम् ...............................

   ख. मित्रादभयममित्राद् ......................

   ग. नश्चतस्रः ................................

घ. सन्त्वापः ..................................

ङ. यत्किञ्च ..................................

**2. पाठम् अनुसृत्य अधोलिखितेषु पदेषु सन्धिं सन्धिच्छेदं वा कुरुत –**

क. शम् + नः = ........................

ख. प्रदिशो भवन्तु = ........................ + ........................

ग. सर्वाः + आशाः = ........................

घ. उरुचक्षा उदेतु = ........................ + ........................

ङ. शम् + नः = ........................

**3. अधोलिखितानाम् अर्थानां स्थाने पाठे प्रयुक्तानि पदानि लिखत –**

| | *पदानि* | | *अर्थाः* |
|---|---|---|---|
| क. | ........................ | = | पश्यामि |
| ख. | ........................ | = | कल्याणम् |
| ग. | ........................ | = | नयनम् |
| घ. | ........................ | = | वैरी |
| ङ. | ........................ | = | समक्षम् |
| च. | ........................ | = | गिरयः |
| छ. | ........................ | = | अस्माकम् |
| ज. | ........................ | = | जलानि |
| झ. | ........................ | = | परिचितः |
| ञ. | ........................ | = | निशायाम् |

## 4. उचितसर्वनामपदैः रिक्तस्थानपूर्तिं कुरुत -

क. सर्वे प्राणिनः ........................ मित्रदृष्ट्या पश्यन्तु। (अस्मद्)

ख. ........................ वस्तूनाम् उपभोगः आसक्तिं विहाय एव कर्तव्यः। (सर्व)

ग. ........................ त्यक्तेन भुञ्जीथाः। मा गृधः कस्यस्विद् धनम्। (तत्)

घ. दिने वा रात्रौ वा ........................ भयरहिताः भवेम। (अस्मद्)

ङ. अहं मित्रस्य चक्षुषा ........................ भूतानि समीक्षे। (सर्व)

## 5. पाठात् चित्वा विशेषणानि योजयत -

| *विशेषणानि* | *विशेष्याणि* |
|---|---|
| क. ........................ | पर्वताः |
| ख. ........................ | भूतानि |
| ग. ........................ | सर्वम् |
| घ. ........................ | प्रदिशः |
| ङ. ........................ | आशाः |
| च. ........................ | सूर्यः |

## 6. अधोलिखितवाक्येषु कोष्ठकात् उचितं क्रियापदं विचित्य योजयत -

क. अहं मित्रस्य चक्षुषा सर्वाणि भूतानि ........................ । (समीक्षे/ समीक्षामहे)

ख. वयं अहर्निशं भयरहिताः ........................। (भवेयम् / भवेम)

ग. त्वं त्यागपूर्वकं वस्तूनि ........................ । (भुञ्जीथाः / भुञ्जीत)

घ. आपः अस्माकं कल्याणाय ........................ । (अस्तु / सन्तु)

ङ. सर्वाः दिशः मम मित्रं ........................ । (भवन्तु / भवतु)

**7. अधोलिखितान् प्रश्नान् संस्कृतभाषया उत्तरत -**

क. सर्वाणि भूतानि कथं द्रष्टव्यानि?

ख. इदं सर्वं जगत् केन व्याप्तम्?

ग. कति प्रदिशः अस्माकं कल्याणं कुर्वन्तु?

घ. ध्रुवयः पर्वताः अस्माकं कृते कीदृशाः भवेयुः ?

ङ. मम मित्रं काः भवन्तु?

च. केभ्यः अस्माकम् अभयं भवेत्?

**8. अधोलिखितेषु अन्वयेषु उचित-रिक्तस्थानपूर्त्तिं कुरुत -**

क. जगत्यां यत् किञ्च ........................ इदं सर्वम् ईशावास्यम्, तेन ........................ भुञ्जीथाः। कस्यस्विद् धनम् मा ........................।

ख. उरुचक्षा ........................ नः शम् उदेतु। चतस्रः ........................ नः शं भवन्तु।

ध्रुवयः पर्वताः —— शं भवन्तु। सिन्धवः नः शम्। उ ........................ शं सन्तु।

**9. अधोलिखितपङ्क्तीनां भावम् अनुसृत्य पाठात् चित्वा पङ्क्तिं लिखत -**

क. सकलाः दिशः मम मित्रभूताः सन्तु। ........................................................................

ख. सरितः सागराः च अस्माकं कल्याणं कुर्वन्तु । ........................................................

ग. सर्वे प्राणिनः मां मित्रवत् पश्यन्तु। ........................................................................

घ. सर्वः संसारः ईश्वरेण व्याप्तः। ........................................................................

**10. अधः केषाञ्चि श्लोकानां भावार्थः दत्तः। उचितपदैः रिक्तस्थानपूर्तिं कुरुत -**

क. सर्वे प्राणिनः मां ........................ पश्यन्तु। अहम् अपि तान् मित्रवत् ........................ यतः मित्रता सुखदायिनी भवति। यस्मिन् परिवारे समाजे वा ........................ स्नेहः भवति तत्र आनन्दमयं वातावरणं जायते। अतः जनेषु मैत्रीसम्बन्धः ............................ प्राप्नोतु।

ख. एषः जडचेतनरूपः संसारः ....................... व्याप्तः। संसारे लभ्याः ....................... आहारादिकं च प्राणिनाम् उपभोगाय सन्ति। वस्तूनाम् उपभोगः आसक्तिं .................... एव कर्तव्यः। अन्येषां जनानां धनादिकं प्रति ....................... न कर्तव्यः।

ग. अस्माकं जीवनं .............................. भवेत्। मित्रात्, शत्रोः परिचितात् नरात् वस्तुनः वा ....................... भयं न स्यात्। दिने वा ............................ वा वयं भयरहिताः भवेम। मित्रभूताः सर्वाः दिशः अस्मान् .......................।

## पाठ-विकासः

महान् ज्ञानराशिग्रन्थः वेदः। वेदाः चत्वारः सन्ति; ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च इति। आदर्शा समाजव्यवस्था अत्र उपदिष्टा। यथा

संगच्छध्वं, संवदध्वं, सं वो मनांसि जानताम्। देवा भागं यथा पूर्वे संजानाना उपासते।।

(ऋ० : 1.191.2)

प्रतिगृहम् अपि परस्परं सम्मानभावः भवेत्।

अनुव्रतः पितुः पुत्रो, माता भवतु संमनाः।

जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्।। (अथर्व : 3.30.2)

अपि च

न स सखा यो न ददाति सख्ये। (ऋ० : 10.117.4)

केवलाघो भवति केवलादी। (ऋ० : 10.117.6)

पाठे प्रथमः मन्त्रः ऋग्वेदात्, द्वितीयः यजुर्वेदात्, तृतीयः अथर्ववेदात्, चतुर्थः च पुनः यजुर्वेदात् एव सङ्कलितः। एते मन्त्राः अस्मा मैत्रीभावस्य, समताभावस्य, भ्रातृत्वभावस्य पाठं शिक्षयन्ति ।

एते भावाः एव अधोलिखितेषु मन्त्रेषु अपि दत्ताः

## समानान्तरप्रयोगाः

मेधां मे वरुणो ददातु, मेधामग्निः प्रजापतिः,

मेधामिन्द्रश्च वायुश्च, मेधां धाता ददातु मे।। (यजु. 32/35)

वरुणः मह्यम् बुद्धिं ददातु, अग्निः प्रजापतिः अपि मह्यं बुद्धिं ददातु।

विश्वस्य धारणकर्ता ईश्वरः अपि मह्यम् बुद्धिं ददातु।।

शं नो मित्रा, शं नो भवत्वर्य्यमा,

शं न इन्द्रो बृहस्पतिः, शं नो विष्णुरुरुक्रमः।। (ऋ. 1/90/9)

मित्रः अस्मभ्यं सुखकरः भवतु, वरुणः, अर्यमा, इन्द्रः, बृहस्पतिः दूरात्दूरं गमने समर्थः विष्णुः एते सर्वे एव अस्मभ्यं सुखकराः भवन्तु।

यतो यतः समीहसे, ततो नो अभयं कुरु,।

शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः।। (यजु. 40/16)

हे देवानां देव! यस्मात् एव स्थानात् त्वं प्रकटितः भवसि, तस्मात् एव स्थानात् अस्मभ्यं निर्भयतां प्रयच्छ, अस्माकं सन्ततिः, पशवः च भयमुक्ताः भवेयुः।

अनमित्रं नो अधराद् अनमित्रं न उत्तरात्, इन्द्रानमित्रं नः पश्चाद् अनमित्रं पुरस्कृधि।।

हे इन्द्र! भवान् अस्मभ्यं सर्वतः शत्रुराहित्यं प्रददातु । सर्वतः अस्मभ्यं अभयदानं प्रापयतु।

द्वितीयः पाठः

# सर्वे सन्तु निरामयाः

'शरीरम् आद्यं खलु धर्मसाधनम्' इति प्रसिद्धा उक्तिः। स्वस्थं शरीरं विना वयं संसारे किमपि कार्यं कर्तुं समर्थाः न भवामः। स्वास्थ्यं तु आहारे आश्रितम्, उक्तञ्च-*आहारशुद्धौ सत्त्वसंशुद्धिः*। आहारः अपि हितकरः स्यात्, उचितमात्रायां स्यात्, ऋतु-अनुसारं च स्यात् इत्येव स्वास्थ्यस्य आधारः। आहारविषये कथ्यते यद् *'अतिभोजनं स्वास्थ्यं नाशयति, आयुषः च क्षयं करोति'*। अतः आहारविषयकाणां नियमानाम् अनुपालनं कृत्वा निरामयाः भवेम इत्येव सन्दिशति अयं पाठः- *'सर्वे सन्तु निरामयाः'*।

एकं वनम्। केचन शिष्याः गुरुः च वने विचरन्ति स्म। सहसा तत्र विचित्रः शब्दः श्रुतः- ''कोऽरुक्, कोऽरुक्, कोऽरुक्'' इति। चकिताः शिष्याः इतस्ततः पश्यन्ति। 'अये! विचित्रः खलु अयं ध्वनिः कुतः आयाति? इति चिन्तयन्ति। तदैव एकस्य शिष्यस्य दृष्टिः वृक्षस्थे विहगे अपतत्। सः पुनः पुनः रटति स्म 'कोऽरुक् कोऽरुक कोऽरुक्' इति। विस्मितः शिष्यः आचार्यं पृच्छति - गुरुवर! अयं किं वदति? आचार्यः अकथयत्-शोभनम् पृष्टम्। कथयिष्यामि। अस्य वृक्षस्य अधः उपविशन्तु! सर्वं कथयामि। (सर्वे उपविशन्ति)



**आचार्यः** शिष्याः!शृणुत! एषः विहगः वदति 'कोऽरुक् कोऽरुक्' इति! अर्थात् कः अरुक्? कस्तावत् स्वस्थः नीरोगः वा?

***शिष्यः*** आचार्य । तदा कः स्वस्थः?

**आचार्यः** यः हितभुक् मितभुक्, ऋतुभुक् च भवति स एव सर्वदा स्वस्थः।

***शिष्यः*** आचार्य! 'हितभुक्, मितभुक्, ऋतुभुक्' इति एतेषां कः आशयः?

**आचार्यः** अपि भवद्भिः महर्षेः चरकस्य नाम श्रुतम्?

***सर्वे शिष्याः*** आम्। जानीमः। तेन एव लिखिता 'चरकसंहिता' इति आयुर्वेदस्य महान् ग्रन्थः।

**आचार्यः** शोभनम्। एतेषाम् आशयः तु तत्रैव वर्तते! अधुना शृणुत – हितभुक् कः? यः हितकरं भुङ्क्ते। यथा हि-

***तच्च नित्यं प्रयुञ्जीत, स्वास्थ्यं येनानुवर्तते।***
***अजातानां विकाराणामनुत्पत्तिकरं च यत्॥***

अर्थात् यस्य आहारस्य सेवनेन स्वास्थ्यस्य रक्षणं भवेत्, न जातानाम् अनुत्पन्नानां विकाराणाम् उत्पत्तिः न भवेत्, स एव आहारः सेवनीयः।

***शिष्याः*** आचार्य। किं फलसेवनं ''हितकरम्''?

**आचार्यः** आम्! फलानि स्वास्थ्यरक्षकाणि एव।

**एकः शिष्य** आचार्य! इदं वनं तु बहुफलम्। बुभुक्षा अपि वर्तते। अद्य तु वयं बहूनि फलानि भक्षयिष्यामः।

**आचार्यः** मा मैवम्। हितकराः अपि पदार्थाः यदि अतिमात्रं भुज्यन्ते, तदा हानिकराः भवन्ति। पदार्थानां लघुता गुरुता च मात्रायां निर्भरा ।श्रूयताम्-

***अल्पादाने गुरूणां च लघूनां चातिसेवने ।***
***मात्रा कारणमुद्दिष्टं, द्रव्याणां गुरुलाघवे॥***

***शिष्याः*** आचार्य! अस्य कः आशयः?

**आचार्यः** शृणु! गरिष्ठद्रव्याणि अपि अल्पमात्रया सेवनेन सुपाच्यानि भवन्ति, लघुद्रव्याणि च अतिमात्रं सेवनेन हानिकराणि जायन्ते। अतः मात्रानुसारम् एव खादितव्यम्।

***शिष्याः*** अथ तावत् ऋतुभुक् इति कः भवति?

**आचार्यः** साधु पृष्टम्। कति ऋतवः, जानीथ?

***शिष्याः*** – जानीमः वयम्। ऋतवः षट् –

ग्रीष्मः, वर्षा, शरद्, शिशिरः, हेमन्तः, वसन्तः, चेति।

**आचार्यः** – सत्यम् उक्तम्। यदि आहारः ऋतोः अनुसारं न खाद्यते, तस्मादपि स्वास्थ्यस्य हानिः भवति।

***तस्याशिताद्यादाहारात्, बलवर्णञ्च वर्धते।***
***तस्यर्तुसात्म्यं विदितम्, चेष्टाहारव्यपाश्रयम्।।*** *(सूत्रस्थान 6.3)*

***शिष्याः*** – न स्पष्टं भगवन्!

**आचार्यः** – श्रूयताम्! यः पुरुषः आहारविषयकम् ऋतु-सात्म्यं जानाति, तथा आचरति, तस्य अशितं अर्थात् भुक्तं पीतं सर्वमपि बलवर्धकं, वर्णकान्तिजनकं, सुखवर्धकम् आयुवर्धकञ्च भवति। अतः ऋतोः अनुसारं भोक्तव्यम्।

***शिष्याः*** – आचार्य! धन्यवादाः। अस्य विहगस्य स्वरेण नूनम् अस्माकं ज्ञाने वृद्धिः जाता।

**आचार्यः** – प्रियच्छात्राः! संक्षेपेण स्थास्थ्यस्य रक्षणाय चत्वारि सूत्राणि सर्वदैव स्मर्तव्यानि।

***प्रातःकाले व्यायामः, नित्यं दन्तविशोधनम्।***
***स्वच्छजलेन सुस्नानं, बुभुक्षायाञ्च भोजनम्।।***

अतएव अस्माकं ऋषयः अपि प्रार्थनां कुर्वन्ति स्म –

**सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।**

## *अनुप्रयोगः*

1. क. **निम्नलिखितानां पदानां शुद्धम् उच्चारणं कुरुत –**

कोऽरुक्, ऋतुसात्म्यम्, प्रयुञ्जीत, गरिष्ठद्रव्याणि, पृष्टम्, बुभुक्षा, स्मर्तव्यानि।

ख. **निम्नलिखितानां पदानाम् अनुलेखं कुरुत –**

प्रयुञ्जीत, उद्दिष्टम्, ग्रीष्मः, अशिताद्यात्, गुरुलाघवे, अनुत्पत्तिकरम्।

**2.　पाठात् चित्वा अधोलिखितानां पदानां यथोचितं संधिं सन्धिविच्छेदं वा कुरुत -**

क.　इतस्ततः= .......................... + ..........................

ख.　उत्पत्तिर्न= ......................... + ..........................

ग.　.........................　= प्रिय + छात्राः

घ.　क आशयः　=.........................　+ ..........................

ङ.　.........................= निर् + रोगः

**3.　अ.　अधोलिखितानां वाक्यानां रिक्तस्थानेषु कोष्ठकदत्तैः शब्दैः सह विभक्तिं प्रयुज्य कर्तृपदानि पूरयत -**

क.　वृक्षस्थः (पक्षिन्) ...................... कोऽरुक् ! कोऽरुक ! इति रटति स्म ।

ख.　(लघुद्रव्य) ...................... अतिमात्रं सेवनेन हानिं कुर्वन्ति।

ग.　(मितभुज्) ...................... मात्रानुसारं भोजनं कुर्वन्ति ।

घ.　(यत्) ...................... हितकरं भोजनं खादति, स हितभुक् इति उच्यते।

ड.　स्वास्थ्यरक्षायै (चतुर्) ...................... सूत्राणि महत्त्वपूर्णानि सन्ति।

**आ.　अधोलिखितवाक्यानां रिक्तस्थानेषु कोष्ठकदत्तैः धातुभिः उचितरूपं निर्माय क्रियापदानि पूरयत -**

क.　किं यूयम् ऋतूणां नामानि (ज्ञा लट्) ...................... ।

ख.　विहगः वृक्षस्योपरि (स्था लङ्) ...................... ।

ग.　स्वास्थ्यरक्षार्थं नरः ऋतोः अनुसारं (भुज् विधि-लिङ्) ...................... ।

घ.　अद्य शिष्याः बहूनि फलानि (भक्ष् लृट्) ...................... ।

**4.　पाठात् चित्वा विग्रहपदानां स्थाने समस्तपदानि, समस्तपदानां स्थाने च विग्रहान् लिखत-**

क.　बहूनि फलानि सन्ति यस्मिन्　..........................　..........................

ख.　चकितशिष्याः　..........................　..........................

ग.　वृक्षे स्थितः (तस्मिन्)　........................ ........................

घ.　न रुक्　........................ ........................

च.　यः हितं भुनक्ति　........................ ........................

छ.　मात्राम् अनतिक्रम्य　........................ ........................

**5. कक्षा भागद्वये विभक्ता। एकः चरकवर्गः द्वितीयश्च सुश्रुतवर्गः। चरकवर्गः कर्तृवाच्ये सुश्रुतवर्गः च कर्मवाच्ये वदति। उभयोः वाक्यानां वाच्यपरिवर्तनं लिखत –**

| ***चरकवर्गः*** | ***सुश्रुतवर्गः*** |
|---|---|
| **क.** शिष्याः एकं विचित्रं शब्दं श्रुतवन्तः। | ............................................ |
| **ख.** ............................................ | अद्य अस्माभिः बहूनि फलानि भक्षयिष्यन्ते। |
| **ग.** स्वास्थ्यरक्षार्थं नरः हितकरम् आहारं सेवेत। | ............................................ |
| **घ.** ............................................ | किं युष्माभिः ऋतूनां संख्या ज्ञायते? |
| **ङ.** अपि भवन्तः महर्षेः चरकस्य नाम श्रुतवन्तः? | ............................................ |
| **च.** ............................................ | अनेन ध्वनिना कुतः आगम्यते? |
| **छ.** सर्वे सुखिनः भवन्तु | ............................................ |
| **ज.** ............................................ | भवता तु पक्षिणां वाक् अवगम्यते। |

6. **निम्नलिखितेषु वाक्येषु रेखाङ्कितानि सर्वनामपदानि कस्य स्थाने प्रयुक्तानि ? पाठम् आधृत्य लिखत -**

1. वृक्षे एकः विहगः अतिष्ठत् यः पुनः पुनः उच्चैः अरटत्। .........................
2. जानीमः वयम्। .........................
3. तेन लिखिता चरकसंहिता। .........................
4. अस्य मूले उपविश्य सर्वं कथयामि। .........................
5. अस्य स्वरेण नूनम् अस्माकं ज्ञाने वृद्धिः जाता। .........................

7. **प्रश्नान् उत्तरत -**

1. विहगः उच्चैः किं रटति स्म?
2. चरकसंहिता कस्य वेदस्य महान् ग्रन्थः?
3. हितकराः अपि पदार्थाः कथं भुक्ताः हानिकराः भवन्ति?
4. ऋतवः कति सन्ति?
5. यः ऋतु-अनुसारं अश्नाति तस्य आयुः वर्धते वा क्षीयते वा?
6. व्यायामः कदा करणीयः ?
7. कुत्र उपविष्टः विहगः उच्चैः रटति स्म?

8. **अधोलिखितयोः भावार्थयोः रिक्तस्थानपूर्तिं कुरुत -**

क. तच्च नित्यं प्रयुञ्जीत, स्वास्थ्यं येनानुवर्तते ।
अजातानां विकाराणामनुत्पत्तिकरं च यत् ।।

हितकरभोजनस्य वर्णनं कुर्वन् चरकः कथयति, येन ...................... विहारेण च स्वास्थ्यस्य ......................भवेत्, न जातानां विकाराणाम् ...................च न स्यात्, ................सेवनीयम्।

ख.    प्रात:काले व्यायाम:, नित्यं दन्तविशोधनम्।
स्वच्छजलेन सुस्नानं, बुभुक्षायां च भोजनम्।।

अस्मिन् श्लोके स्वास्थ्यरक्षणार्थं चत्वारि ........................ वर्णितानि यथा य: प्रात:काले ......................, नित्यं ................, स्वच्छजलेन स्नानं, ......................... एव भोजनं करोति, स एव स्वस्थ: नीरोग: च भवति।

## 9. अधोलिखितानां श्लोकानाम् अन्वये रिक्तस्थानपूर्तिः कार्या -

क.    अल्पादाने गुरूणां च, लघूनां चातिसेवने ।
मात्राकारणमुद्दिष्टं, द्रव्याणां गुरुलाघवे ।।

........................ गुरुलाघवे, गुरूणां ......................... च, ......................... अतिसेवने च मात्रा(एव)....................... उद्‌दिष्टम्।

ख.    तच्च नित्यं प्रयुञ्जीत, स्वास्थ्यं येनानुवर्तते।
अजातानां विकाराणामनुत्पत्तिकरं च यत्।

येन ...................... अनुवर्तते, यत् च ....................... विकाराणाम् ...................... (भवेत्), तत् च .............. प्रयुञ्जीत।

ग.    तस्याशिताद्यादाहाराद्, बलवर्णञ्च वर्धते।
तस्यर्तुसात्म्यं विदितं, चेष्टाहारव्यपाश्रयम्।।

तस्य ........................ व्यपाश्रयम् ......................... विदितं, तस्य ......................... आद्यात् आहारात् ....................... च वर्धते।

10. मञ्जूषायां प्रदत्तेभ्यः कथनेभ्यः स्वास्थ्यरक्षणार्थं 'किं कर्तव्यं किं च न कर्तव्यम्' इति पृथक् स्तम्भेषु लिखत –

**मञ्जूषा**

प्रातःकाले व्यायामः कर्तव्यः । मात्रानुसारं भोजनं खादेत्।
सूर्योदयात् पूर्वम् स्वपितव्यम्। सूर्योदयात् परम् उत्थातव्यम्।
अतिमिष्टान्नं भुञ्जीत नित्यं स्वच्छजलेन स्नानं कुर्यात्।
सर्वं दिनं दूरदर्शनं पश्येत् । ऋतोः अनुसारं भोजनं कुर्यात्।
नित्यम् अतितीक्ष्णं भोजनं कर्तव्यम्। बहूनि फलानि नित्यं खादितव्यानि।

| कर्तव्यम् | न कर्तव्यम् |
|---|---|
| क. | अ. |
| ख. | ब. |
| ग. | स. |
| घ. | द. |
| ङ. | इ. |

# पाठविकासः

## क. चरकसंहितायाः परिचयः

अस्य पाठस्य मुख्यविषयवस्तु चरकसंहितायाः सङ्कलितम् । चरकसंहिता आयुर्वेदस्य प्रमुखः ग्रन्थः अस्ति। अस्मिन् ग्रन्थे अष्टस्थानानि सन्ति। यथा हि-सूत्रस्थानं, निदानस्थानं, विमानस्थानं, शरीरस्थानम्, इन्द्रियस्थानं, चिकित्सास्थानं, कल्पस्थानं सिद्धिस्थानं चेति। अत्र न केवलं रोगाणां चिकित्सा एव वर्णिता, अपितु स्वास्थ्यस्य संरक्षणार्थम् आयुषः च सवंर्धानार्थम् उपायाः अपि निर्दिष्टाः, अत एव अयम् आयुर्वेदस्य प्रमुखः ग्रन्थः मन्यते।

## ख. महर्षेः चरकस्य परिचयः

चरकसंहितायाः लेखकः महर्षिचरकः। एषः राज्ञः कनिष्कस्य राजवैद्यः आसीत्। अयम् ईसवीय-प्रथमशताब्द्याम् अभवत् इति मन्यते। एषः मूलतः गन्धारदेशस्य निवासी आसीत्।

## ग. समानान्तरसूक्तयः

1. *आहारविषये*

आयुः सत्त्वबलारोग्य- सुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या, आहाराः सात्त्विकप्रियाः।। (भगवद्गीता 17.8)

आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः। (छान्दोग्योपनिषद् 7/26/2)

2. *मात्राविषये*

भोजनं प्राणरक्षार्थं विद्यते नात्र संशयः ।
अधिकं हानये तस्मात् युक्ताहारपरो भवेत् ।। (चरकसंहिता व्याख्या)

अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम्।
अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत्।। (मनुस्मृतिः 2/57)

मिताहारो नरः सोढुं, शक्तः कष्ट-शतं सुखम्।

अनभ्यस्तो हि कष्टानामध्यशनो विपद्यते।। (सुमनोवाटिका)

भोजनं परमेशस्य, भक्तये जीवनाय च।

त्वं तु मूर्ख विजानासि, भोजनार्थं हि जीवनम्।। (सुमनोवाटिका)

3. *ऋतुसात्म्यम्*

ऋतवः षट् सन्ति। चरकेण ऋत्वनुसारं सेवनासेवनयोग्यानां खाद्यपेयपदार्थानां वर्णनम् एवं कृतम्।

हेमन्ते

तस्मात्तुषारसमये स्निग्धाम्ललवणान् रसान्।
गोरसानिक्षुविकृतीर्वसां तैलं नवौदनम्।।

शिशिरे

कटुतिक्तकषायाणि, वातलानि लघूनि च ।
वर्जयेदन्नपानानि, शिशिरे शीतलानि च ।।

वसन्ते

तस्माद्वसन्ते कर्माणि, वमनादीनि कारयेत् ।
गुर्वम्लस्निग्धमधुरं, दिवास्वप्नं च वर्जयेत् ।।

ग्रीष्मे

शीतं सशर्करं मन्थं जाङ्गलान् मृगपक्षिणः ।
घृतं पयः सशाल्यमन्नं भजन् ग्रीष्मे न सीदति।

वर्षायाम्

वर्षास्वग्निबले क्षीणे, कुप्यन्ति पवनादयः ।
तस्मात् साधारणः सर्वो विधिर्वर्षासु राजते ।।

शरदि

तत्रान्नपानं मधुरं, लघुशीतं सतिक्तकम् ।
पित्तप्रशमनं सेव्यं, मात्रया सुप्रकांक्षितैः ।। (चरकसंहिता)

*4.* *व्यायाम:*

लाघवं कर्मसामर्थ्यं, स्थैर्यं क्लेशसहिष्णुता ।
दोषक्षयोऽग्निवृद्धिश्च, व्यायामादुपजायते ।। (सूत्रस्थान 7-31)

शरीरचेष्टा या चेष्टा, स्थैर्यार्था बलवर्धिनी ।
देहव्यायामसंख्याता, मात्रया तं समाचरेत् ।। (सूत्रस्थान 7-30)

*5.* *स्नानम्*

पवित्रं वृत्यमायुष्यं, श्रमस्वेदमलापहम् ।
शरीरबलसंधानं, स्नानमोजस्करं परम् ।। (सूत्रस्थान 7.91)

तृतीयः पाठः

# शीलम् एतत् प्रशस्यते

**सुभाषितानि संस्कृतभाषायाः रत्नानि सन्ति। 'सुष्ठु भाषितम्' इति सुभाषितम्। लघुकलेवराणि अपि एतानि सुभाषितानि भावदृष्ट्या महान्तम् अर्थम् उद्वहन्ति। व्यावहारिके जीवने एतेषां सुवचनानां विशिष्टं महत्त्वम् अस्ति। नैराश्ये एतानि प्रेरकानि वचनानि प्रेरणारूपेण कार्यं कुर्वन्ति। लोकाचारं व्यवहारज्ञानं च प्रदाय जीवनपथं परिष्कुर्वन्ति। जीवनस्य पथि एतानि पाथेयमिव अस्माकं हितं रचयन्ति।**

**अधुना पठिष्यामः कानिचित् एतानि सुन्दराणि हितकराणि सुभाषितानि अस्मिन् पाठे।**

1. **सम्भोजनं सङ्कथनं सम्प्रीतिश्च परस्परम्।**
**ज्ञातिभिः सह कार्याणि न विरोधः कदाचन॥**

*अन्वयः-* ज्ञातिभिः सह सम्भोजनम्, सङ्कथनम् सम्प्रीतिः च कार्याणि। परस्परम् विरोधः कदाचन न कार्यः।

2. **चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम्।**
**प्रसादयति यो लोकं तं लोकोऽनुप्रसीदति॥**

*अन्वयः-* यः चक्षुषा मनसा वाचा कर्मणा च लोकम् चतुर्विधम् प्रसादयति, लोकः तम् अनुप्रसीदति।

3. **आशायाः ये दासास्ते दासाः सर्वलोकस्य ।**

**आशा येषां दासी तेषां दासायते लोकः ॥**

*अन्वयः-* ये आशायाः दासाः ते सर्वलोकस्य दासाः (भवन्ति) । आशा येषाम् दासी, लोकः तेषाम् दासायते ।

4. **क्षणे रुष्टाः क्षणे तुष्टा, रुष्टास्तुष्टा क्षणे क्षणे ।**

**अव्यवस्थितचित्तानां प्रसादोऽपि भयङ्करः ॥**

*अन्वयः-* ये क्षणे रुष्टाः क्षणे (च) तुष्टाः क्षणे-क्षणे च रुष्टाः तुष्टाः भवन्ति । (तेषाम्) अव्यवस्थितचित्तानाम् प्रसादः अपि भयङ्करः (भवति) ।

5. **यथा भूमिः तथा तोयं, यथा बीजं तथाङ्कुरः ।**

**यथा देशः तथा भाषा, यथा राजा तथा प्रजा ॥**

*अन्वयः-* यथा भूमिः तथा तोयम्, यथा बीजम् तथा अङ्कुरः । यथा देशः तथा भाषा यथा राजा तथा प्रजा ।

6. **कराविव शरीरस्य नेत्रयोरिव पक्ष्मणी ।**

**अविचार्य प्रियं कुर्यात्तन्मित्रं मित्रमुच्यते ॥**

*अन्वयः-* करौ शरीरस्य इव, पक्ष्मणी नेत्रयोः इव (यत् मित्रम्) अविचार्य प्रियम् कुर्यात् तत् मित्रम् मित्रम् उच्यते ।

7. **आरभन्तेऽल्पमेवाज्ञाः कामं व्यग्राः भवन्ति च ।**

**महारभ्भाः कृतधियस्तिष्ठन्ति च निराकुलाः ॥**

*अन्वयः-* अज्ञाः अल्पम् एव आरभन्ते, कामम् व्यग्राः च भवन्ति । कृतधियः, महारम्भाः निराकुलाः च तिष्ठन्ति ।

8. **यः पठति लिखति पश्यति,**

**परिपृच्छति पण्डितानुपाश्रयति।**

**तस्य दिवाकरकिरणैः नलिनी-**

**दलमिव विकास्यते बुद्धिः ॥**

*अन्वयः–* यः पठति, लिखति, पश्यति, परिपृच्छति, पण्डितान् उपाश्रयति, दिवाकरकिरणैः नलिनीदलम् इव तस्य बुद्धिः विकास्यते।

9. **अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा।**

**अनुग्रहश्च दानञ्च शीलमेतत् प्रशस्यते ॥**

*अन्वयः–* कर्मणा मनसा गिरा सर्वभूतेषु अद्रोहः, अनुग्रहः च दानम् च एतत् शीलम् प्रशस्यते।

## *अनुप्रयोगः*

**1. (क) अधोलिखितानां पदानाम् उच्चारणम् कुरुत –**

सम्प्रीतिश्च , लोकोऽनुप्रसीदति , रुष्टास्तुष्टाः , नेत्रयोरिव , कराविव , कुर्यात्तन्मित्रम् , कृतधियस्तिष्ठन्ति

**(ख) उपर्युक्तपदानाम् अनुलेखनम् कुरुत।**

**2. (अ) अधोलिखितेषु पदेषु तालव्यवर्णान् चित्वा लिखत –**

(क) चक्षुषा ........................... ...........................

(ख) आशायाः ........................... ...........................

(ग) आश्रयति ........................... ...........................

(घ) वाचि ........................... ...........................

(ङ) सम्भोजनम् ........................... ...........................

**2. (ब) निर्देशानुसारम् उत्तरत –**

(क) 'रुष्ट:' इति पदे क: वर्ण: ओष्ठ्य: ?

(ख) 'तुष्ट:' इति पदे क: वर्ण: दन्त्य: ?

(ग) 'किरणै:' इति पदे क: वर्ण: कण्ठतालव्य: ?

(घ) 'अविचार्य' इति पदे क: वर्ण: दन्तोष्ठ्य: ?

(ङ) 'भाषा' इति पदे क: वर्ण: मूर्धन्य: ?

**3. (अ) उदाहरणम् अनुसृत्य अधोलिखितानां पदानां समासं कुरुत –**

*यथा* न धर्म: – अधर्म:

न अभ्यास: – अनभ्यास:

(क) न विचार्य ..........................................

(ख) न द्रोह: ..........................................

(ग) न ज्ञ: (जानाति इति) ..........................................

(घ) न जीर्ण: ..........................................

(ङ) न उचितम् ..........................................

**3. (ब) अधोलिखिततालिकायां रिक्तस्थानपूर्तिं कुरुत –**

(क) दानम् + च = ...........................

(ख) रुष्टा: + तुष्टा: = ...........................

(ग) प्रीति: + ........ = प्रीतिश्च

| | | | | |
|---|---|---|---|---|
| (घ) ......... | + | इव | = | नेत्रयोरिव |
| (ङ) ......... | + | च | = | अनुग्रहश्च |
| (च) करौ | + | इव | = | ........................ |
| (छ) प्रसादः | + | अपि | = | ........................ |

**4. पदानां समानार्थकानि पदानि पाठात् चित्वा लिखत -**

(क) सहभोजनम् ..................

(ख) सम्बन्धिभिः ..................

(ग) जलम् ..................

(घ) संसारः ..................

(ङ) वाचा ..................

(च) अनुग्रहः ..................

(छ) हस्तौ ..................

(ज) परितृप्तः ..................

**5. 'यथा' 'तथा' इति अव्यययोः प्रयोगः सह एव भवति।**

*उदाहरणम्–*

यथा गुरवे रोचते शिष्यः तथा करोति।

**एवमेव अधोलिखितानि वाक्यानि पूरयत–**

(क) .................. भूमिः .................. जलम्।

(ख) .................. बीजम् .................. अङ्कुरः।

(ग) .................. देशः .................. भाषा।

(घ) .................. राजा .................. प्रजा।

(ङ) .................. करौ शरीरं रक्षतः पक्ष्मणी च नेत्रयोः रक्षां कुरुतः .................. एव सन्मित्रम् मित्रस्य हितं करोति।

(च) .................. सूर्यकिरणाः कमलिनीपत्रं विकासयन्ति .................. विद्यायाः अभ्यासः बुद्धेः विकासं करोति ।

## 6. अधोलिखितान् प्रश्नान् संस्कृतभाषया उत्तरत -

(क) कैः सह विरोधः न कर्तव्यः ?

(ख) लोकः केभ्यः दासवत् आचरति ?

(ग) केषां कृपा अपि भयम् उत्पादयति ?

(घ) संसारः कं नरम् अनुप्रसीदति ?

(ङ) शीलं किं कथ्यते ?

(च) कस्य बुद्धिः विकसिता भवति ?

(छ) महत्कार्यं कुर्वन्तः अपि के व्याकुलाः न भवन्ति ?

## 7. अधोलिखितभावानां समक्षं पाठात् चित्वा समुचितं श्लोकं पंक्तिम् वा लिखत -

(क) बुद्धिमन्तः महद् अपि कार्यम् आरभ्य कदापि व्याकुलाः न भवन्ति ।

........................................................................................................................

(ख) यादृशी भूमिः भवति जलस्य आस्वादः अपि तादृशः एव भवति ।

........................................................................................................................

(ग) अस्थिरचित्ताः जनाः अतिशीघ्रम् प्रसन्नाः अप्रसन्नाः वा भवन्ति । अतः तेषाम् अनुग्रहः अपि विश्वसनीयः न भवति ।

........................................................................................................................

(घ) बुद्धेः सम्यक् विकासार्थं पठनं लेखनं परिप्रश्नः आदिभिःक्रियाविधिभिः अभ्यासः कर्तव्यः ।

........................................................................................................................

(ङ) यस्य नरस्य नयनयोः प्रेमभावः, मनसि परहितचिन्तनं, वाचि माधुर्यं, कर्मणि च प्रियं हितं कर्तुम् तत्परता भवति सः एव लोके प्रशंसनीयः।

..........................................................................................................

## 8. श्लोकान् आधृत्य रिक्तस्थानानि पूरयत -

(क) सम्बन्धिभिः सह कदापि .................. न कर्त्तव्यः।

(ख) .................. दासाः सर्वलोकस्य दासाः भवन्ति।

(ग) अस्थिरचित्तानाम् अनुग्रहः अपि .................. जनयति।

(घ) .................. कार्यम् आरभ्य व्याकुलाः भवन्ति।

(ङ) सर्वभूतेषु .................., अनुग्रहः .................. च शीलं कथ्यते।

## 9. अधोलिखितानां सूक्तीनां समक्षं पाठात् चित्वा समुचितपङ्क्तिं लिखत -

(क) सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।

..........................................................................................................

(ख) अङ्गीकृतं सुकृतिनः परिपालयन्ति।

..........................................................................................................

(ग) देशमाख्याति भाषणम्।

..........................................................................................................

(घ) राज्ञि धर्मिणि धर्मिष्ठाः, पापे पापाः समे समाः।

..........................................................................................................

(ङ) अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया:।

..........................................................................................................

# पाठविकासः

क. पाठे सङ्कलितानां सुभाषितानां सन्दर्भाः

| *श्लोकसङ्ख्या* | *सन्दर्भग्रन्थः* |
|---|---|
| 1-2 | विदुरनीतिः |
| 3 | कवितामृतकूपः |
| 4 | अज्ञातः |
| 5 | वैद्यकीयसुभाषितम् |
| 6 | सुभाषितरत्नभाण्डागारम् |
| 7 | मनुस्मृतिः |
| 8 | शिशुपालवधम् |
| 9 | सुभाषितरत्नभाण्डागारम् |

ख. समानान्तरसूक्तयः

- आशा नाम मनुष्याणां काचिदाश्चर्यशृङ्खला ।
  यया बद्धा प्रधावन्ति मुक्तास्तिष्ठन्ति पङ्गुवत् ।।

- अवशेंन्द्रियचित्तानां हस्तिस्नानमिव क्रिया ।
  दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना ।।

- विघ्नैः पुनः पुनः अपि प्रतिहन्यमानाः
  प्रारभ्य चोत्तमजनाः न परित्यजन्ति ।

- अङ्गीकृतं सुकृतिनः परिपालयन्ति ।

- न्याय्यात्पथः प्रविचलन्ति पदं न धीराः।

- समानी व आकूतिः समाना हृदयानि वः।
  समानमस्तु वो मनो यथा वः सुसहासति ॥ (ऋग्वेदः 10/191/4)

- क्षणमानन्दितामेति क्षणमेति विषादिताम्।
  क्षणं सौम्यत्वमायाति सर्वस्मिन्नटवन्मनः ॥ (योगवासिष्ठः 1/28/38)

- किमिवावसादकरमात्मवताम्। (किरातार्जुनीयम् 6/19)

चतुर्थः पाठः

# यशोधनानां हि यशो गरीयः

कृषिप्रधानाय भारतदेशाय गोः महत्त्वं सुविदितम् एव। इदम् एव कारणम् अस्ति यत् भारतीयसाहित्ये संस्कृत्यां च सर्वत्र गोः महत्त्वं प्रतिपादितं वर्तते। प्राचीनकाले राजानः गवां रक्षणार्थम् आत्मनः प्राणोत्सर्गम् अपि कर्तुं तत्पराः भवन्ति स्म। महाकविकालिदासेन एतस्य उदाहरणं महाकाव्ये रघुवंशे सम्यक् प्रतिपादितम्।

अयोध्यायाः महाराजः दिलीपः गुरोः वसिष्ठस्य आदेशेन आश्रमे एव स्थित्वा 'नन्दिनी' नाम्न्याः धेन्वाः सेवाम् अकरोत्। तस्याः रक्षणार्थम् आत्मनः प्राणान् अपि त्यक्तुम् उद्यतः जातः। सा एव घटना अत्र नाटकरूपेण प्रस्तुतीकृता वर्तते। पठामस्तावत् एकाङ्किनाटकम् - यशोधनानां हि यशो गरीयः।



**स्थानम्** = घनं वनम्
**समयः** = मध्याह्नवेला

(नन्दिनीम् अनुगच्छन् दिलीपः प्रविशति ।)

**दिलीपः** (आत्मगतम्) अहो प्रकृत्याः सौन्दर्यं विलक्षणम् । एषा कलकलनिनादिनी भागीरथी द्रुतवेगेन प्रवहति । पुरतः हिमाच्छन्नः गिरिराजः । कुसुमैः समृद्धाः तरवः पक्षिणां कलरवैः चित्तं हरन्ति ।

(नेपथ्ये सिंहगर्जना भवति ।)

अये, सिंहः प्राप्तः । (आशङ्कां नाटयन्)

अत्र नन्दिनी न दृश्यते । कुत्र नु गता भवेत् ? पश्यामि एनाम् । (त्वरितं परिक्रम्य)हा धिक् सिंहेन आक्रान्ता नन्दिनी क्रन्दति । रक्षामि एनाम् । (धनुः उद्यम्य) (आकाशभाषितम्) तिष्ठ रे तिष्ठ दुरात्मन् । आर्तानां परित्राणम् इक्ष्वाकूणां कुलव्रतम् । त्वां दण्डयितुम् एषः दिलीपः समुपस्थितः ।

किं वदसि ? मया रुचिकरं भोजनं प्राप्तम् इति । नैव, नैव । त्वां हत्वा गां रक्षामि । (निषङ्गात् शरं निष्कासयितुम् इच्छति ।) (आत्मगतम्) अये ! किमिदं जातम् ? मम हस्तः शरे सक्तः जातः । हा ! बलं प्रयुज्य अपि हस्तं मोचयितुं न प्रभवामि । अधुना किं करोमि ? कथम् एनां रक्षामि ?

**सिंहः** (मनुष्यवाचा) हा हा हा, मां हन्तुम् इच्छसि ? पश्य, तव शक्तिः मया प्रतिरुद्धा । वायुवेगः पादपान् उन्मूलयितुं शक्नोति, न तु पर्वतान् । जानासि किं, कोऽहम् ?

**दिलीपः** कथं न जानामि । त्वं दुष्टः आततायी च ।

**सिंहः** राजन् ! श्रूयतां तावत् । भगवता शङ्करेण एतस्य वनस्य रक्षार्थं नियुक्तः किङ्करोऽस्मि । मम नाम कुम्भोदरः । अद्य सौभाग्यात् मम व्रतस्य पारणायै एषा धेनुः स्वयम् उपस्थिता ।

**दिलीपः** हे मृगराज ! भगवान् शिवः ममापि आराधनीयः देवः किन्तु भवान् एतां हन्तुं न अर्हति । एषा मम गुरोः वसिष्ठस्य होमधेनुः । संसारे मनसाऽपि कश्चित् अस्याः अनिष्टं कर्तुं न शक्नोति । भवता तु रुद्रौजसा अस्यां प्रहारः कृतः ।

**सिंहः** किं तेन । यदि अस्याः विनाशेन गुरुः क्रुद्धः भवति, तर्हि अन्याः कोटिशः गाः प्रदाय तं तोषयितुम् अर्हति भवान् ।

**दिलीपः** नैतत् शक्यम् ! त्वं मम शरीरेण क्षुधां शमय गां च परिमुञ्च ।

**सिंहः** किमेवम्। एकस्याः धेनोः कृते प्राणान् अपि दातुम् उद्यतोऽसि! शृणु राजन्!

***एकातपत्रं जगतः प्रभुत्वम्***
***नवं वयः कान्तमिदं वपुश्च।***
***अल्पस्य हेतोः बहु हातुमिच्छन्***
***विचारमूढः प्रतिभासि मे त्वम्॥***

**दिलीपः** अहं मूढो वा बुधो वा- एतत् परिहाय धेनुं मुञ्चतु भवान्।

**सिंहः** राजन्! त्वां न हन्तुम् इच्छामि। त्वं तु अहिंस्यः।

**दिलीपः** ***किमप्यहिंस्यस्तव चेन्मतोऽहं,***
***यशःशरीरे भव मे दयालुः।***
***एकान्तविध्वंसिषु मद्विधानां ,***
***पिण्डेष्वनास्था खलु भौतिकेषु॥***

**सिंहः** तथास्तु! अद्याहं तव देहेन क्षुधां शमयामि, गां च मुञ्चामि।

**दिलीपः** अनुगृहीतः अस्मि! आत्मकृत्यं सम्पादय।

(नृपः दिलीपः भूमौ अधोमुखः तिष्ठति, सहसा आकाशात् तस्मिन् पुष्पवृष्टिः भवति।)

**नन्दिनी** वत्स! उत्तिष्ठ, प्रसन्नाऽस्मि ते!

**दिलीपः** (उत्थाय) मातः! क्वासौ सिंहः? सः न दृश्यते।

**नन्दिनी** (सस्नेहम्) पुत्र! सः तु मायासिंहः आसीत्, तव भक्तिं परीक्षितुं मयैव प्रकटीकृतः। नूनं तव भक्तिः अपूर्वा। त्वं सफलकामः भूत्वा चक्रवर्तिनं पुत्रम् आप्नुहि।

**दिलीपः** अनुगृहीतः अस्मि! भवत्याः आशीर्वचनेन लब्धं मया सर्वम्।

(उभौ आश्रमं प्रति परिक्रामतः)

**पटाक्षेपः**

## अनुप्रयोगः

1. **अधोलिखितानां पदानां शुद्धम् उच्चारणं कुरुत -**

| | | | |
|---|---|---|---|
| क. | प्रकृत्याः | ख. | हिमाच्छन्नः |
| ग. | कुलव्रतम् | घ. | निष्कासयितुम् |
| ङ | कोऽहम् | च. | रुद्रौजसा |
| छ. | किमप्यहिंस्यस्तव | ज. | पिण्डेष्वनास्था |

2. **प्रसङ्गानुसारं तं तं भावं प्रदर्शयन्तः अभिनयं कुरुत -**

क. (आकाशभाषितम्) तिष्ठ रे तिष्ठ दुरात्मन्। आर्तानां परित्राणाय इक्ष्वाकूनां कुलव्रतम्। त्वां दण्डयितुम् एषः दिलीपः समुपस्थितः।

ख. सिंहः- (मनुष्यवाचा) हा हा हा, मां हन्तुम् इच्छसि। पश्य, मया तव शक्तिः प्रतिरुद्धा। जानासि किं, कोऽहम् ?

ग. अहं मूढो वा बुधो वा-एतत् परिहाय धेनुं मुञ्चतु भवान्, इमां रक्षितुं देहार्पणाय तत्परोऽहम्।

घ. तथास्तु ! अद्याहं तव देहेन क्षुधां शमयामि गां च मुञ्चामि।

ङ (सस्नेहम्) पुत्र ! नूनं तव भक्तिः अपूर्वा। त्वं सफलकामः भूत्वा चक्रवर्तिनं पुत्रम् आप्नुहि।

3. **अधः समस्तपदानां विग्रहाः दत्ताः। पाठात् विचित्य विग्रहस्य समक्षं समुचितं समस्तपदं लिखत -**

| | ***विग्रहः*** | ***समस्तपदम्*** |
|---|---|---|
| क. | हिमेन आच्छन्नः | ................................................ |
| ख. | गिरीणां राजा | ................................................ |
| ग. | विचारे मूढः | ................................................ |
| घ. | द्रुतः वेगः तेन | ................................................ |

ङ  अधः मुखं यस्य सः  ...............................................

च.  स्नेहेन सह  ...............................................

छ.  सफलाः कामाः यस्य सः  ...............................................

**4. अधोलिखितानां समानार्थकानि पदानि पाठात् चित्वा लिखत –**

| *पदानि* | | *समानार्थकानि पदानि* |
|---|---|---|
| क. | गङ्गा | ............................................... |
| ख. | अग्रे | ............................................... |
| ग. | हिमालयः | ............................................... |
| घ. | पुष्पैः | ............................................... |
| ङ | महीरुहाः | ............................................... |
| च. | केसरी | ............................................... |
| छ. | खगानाम् | ............................................... |
| ज. | पृथिव्याम् | ............................................... |

**5. निर्देशानुसारं शुद्धं क्रियारूपं लिखत –**

(क) राजन् ! त्वं कथं मां .............................. ।(हन्, लृट्)

(ख) अहं धेनुं .............................. । ( मुच्, लट्)

(ग) वत्स ! प्रसन्ना अस्मि ते। .............................. ।(उत् + स्था, लोट्)

(घ) एकस्याः धेनोः कृते प्राणान् अपि दातुम् उद्यतः .............................. ।(अस्, लट्)

(ङ) अहं तव देहेन क्षुधां .............................. ।(शम् + णिच् , लट्)

**6. समुचितैः क्तान्तविशेषणपदैः रिक्तस्थानपूर्तिः क्रियताम् –**

(क) पुरतः .............................. गिरिराजः।

(ख) सिंहेन .............................. नन्दिनी क्रन्दति।

(ग) मम हस्तः शरे .............................. जातः।

(घ) अस्याः विनाशेन गुरुः .............................. भवति।

(ङ) एतस्य वनस्य रक्षार्थं .............................. अहं शङ्करस्य किङ्करोऽस्मि।

7. **अधः कानिचित् कथनानि चारित्रिकमूल्ययुक्तानि। मञ्जूषायाः तं तं भावं विचित्य कथनानां समक्षं लिखत –**

***भावः***

क. त्वां दण्डयितुम् एषः दिलीपः समुपस्थितः। (.......................)

ख. अत्र नन्दिनी न दृश्यते। कुत्र नु गता भवेत्। (.......................)

ग. अल्पस्य हेतोः बहु हातुम् इच्छन् विचारमूढः प्रतिभासि मे त्वम्। (.......................)

घ. यशः शरीरे भव मे दयालुः। (.......................)

ङ वत्स ! उत्तिष्ठ ! प्रसन्नास्मि ते। (.......................)

च. त्वं सफलकामः भूत्वा चक्रवर्तिनं पुत्रम् आप्नुहि। (.......................)

छ. भवत्याः आशीर्वचनेन लब्धं मया सर्वम्। (.......................)

ज. अग्रे स्थितम् अपि अपराधिनं दण्डयितुं न शक्नोमि। (.......................)

| **मञ्जूषा** |
|---|
| आशीर्वादः, दीनता, उत्साहः, स्नेहः, निवेदनम्, कृतज्ञता, भर्त्सना, आशङ्का। |

**8. अधोलिखितं कथनं कः/का कं/कां प्रति कथयति ?**

| | | कः/का | कं/कां प्रति |
|---|---|---|---|
| क. | कथं न जानामि त्वं दुष्टः आततायी च। | ..................... | ..................... |
| ख. | अस्याः विनाशेन कुपिताय गुरवे कोटिशः गाः दत्त्वा तं प्रसादयतु। | ..................... | ..................... |
| ग. | क्वासौ सिंहः ? सः न दृश्यते। | ..................... | ..................... |
| घ. | सः तु मायासिंहः आसीत्। | ..................... | ..................... |
| ङ. | एषा कलकलनिनादिनी भागीरथी द्रुतवेगेन प्रवहति। | ..................... | ..................... |

**9. अधः दत्तासु सूक्तिषु ताः चिनुत याः पाठे न सन्ति -**

क. अल्पस्य हेतोः बहु हातुम् इच्छसि।

ख. यशः शरीरे भव मे दयालुः।

ग. उत्साहो बलवानार्य नास्त्युत्साहात्परं बलम्।

घ. क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः।

ङ एकातपत्रं जगतः प्रभुत्वम्।

च. वायुवेगः पादपानाम् उन्मूलने समर्थः भवति न तु पर्वतानाम्।

छ. प्रजाः प्रजानाथ पितेव पासि।

ज. क्षमा-शस्त्रं करे यस्य दुर्जनः किं करिष्यति ?

**10. अन्वयं पूरयत -**

क. एकातपत्रं ............................. प्रभुत्वं नवं वयः। इदं कान्तं ................. च। अल्पस्य हेतोः ..................... हातुम् इच्छन् त्वं मे विचारमूढः .............................. ।

ख. अहं चेत् तव किम् अपि ...................................... मे .............................. दयालुः भव। मद्विधानां ....................... भौतिकेषु पिण्डेषु .........................अनास्था (भवति)।

## 11. घटनाक्रमानुसारं कथां पुनः लिखत –

क. सः मायासिंहः धेन्वा एव प्रकटीकृतः आसीत् ।

ख. दिलीपः धनुः उत्थाय बाणेन सिंहं हन्तुम् इच्छति ।

ग. दिलीपः वने प्रकृत्याः सौन्दर्यं पश्यति ।

घ. विवशतां गतः राजा स्वशरीरं दत्त्वा गां रक्षितुम् इच्छति ।

ङ राज्ञा सिंहगर्जना श्रूयते ।

च. दिलीपस्य भक्तिं दृष्ट्वा नन्दिनी प्रसीदति तस्मै च पुत्रप्राप्त्यै आशीर्वादं यच्छति ।

छ. नृपः सिंहेन आक्रान्तां धेनुम् अवलोकयति ।

ज. दिलीपस्य हस्तः शरे सक्तः जायते ।

# पाठ–विकासः

अस्य नाट्यांशस्य कथावस्तु रघुवंशात् संगृहीतम् । रघुवंशः महाकवेः कालिदासस्य श्रेष्ठतमा रचना । राजा दिलीपः तस्य पत्नी सुदक्षिणा च सन्ततेः अभावात् दुःखिनौ भूत्वा ऋषेः वसिष्ठस्य आश्रमं गतवन्तौ । मुनिः उक्तवान् राजन् ! त्वम् अत्र वने स्थित्वा कामधेनोः सुतायाः नन्दिन्याः सेवां कुरु । सेवया प्रसन्ना सा तव मनोरथं पूरयिष्यति इति । राजा दिलीपः सपत्नीकः धेनोः सेवां करोति, तस्याः कृते प्राणान् अपि त्यक्तुं तत्परः भवति । सर्वेषां प्राणिनां कृते आदर्शः सम्मानभावः सेवाभावः च अत्र प्रदर्शितः । कालिदासस्य सम्पूर्णं साहित्यं प्रकृतिप्रेमपरिपूर्णं, प्रेरणाप्रदं, शिक्षाप्रदम् च ।

अनेन महाकविना 'कुमारसम्भवम्' 'रघुवंशम्', इति द्वे महाकाव्ये, ऋतुसंहारः मेघदूतम् च इति द्वे गीतिकाव्ये, 'मालविकाग्निमित्रम्', 'विक्रमोर्वशीयम्', अभिज्ञानशाकुन्तलम् च इति त्रीणि नाटकानि रचितानि । 'अभिज्ञानशाकुन्तलम्' तु विश्वप्रसिद्धम् अस्ति ।

अस्य महाकवेः सम्पूर्णसाहित्यस्य आधारः आध्यात्मिकता अस्ति । सर्वत्र प्रकृतिवर्णनम् अत्यद्भुतं मनोहारि च । 'उपमा' पाठकस्य मनः मोहयति । भ्रातृत्वम् अत्र आदर्शः, सेवा च परमं लक्ष्यम् ।

- आत्मगतम्

- आकाशभाषितम्

पंचमः पाठः

# मानसं मम विकसितं कुरु

अस्माकं शरीरं रथवत् अस्ति। पञ्च अश्वाः एनं वहन्ति-चक्षुः, श्रोत्रम्, नासिका, जिह्वा, त्वक् च। मनः एतैः संसारस्य विषयाणाम् उपभोगाय मनुष्यं प्रेरयति। यदि मनुष्यः मनः संयम्य विवेकेन कार्यं करोति तदा जीवने सुखं प्राप्नोति। यदि अविवेकेन कार्यं करोति तदा जीवनं नश्यति। अतः मनसः विकासः अपेक्षितः। वेदेषु अपि कथितम्-तन्मे मनः शिवसङ्कल्पमस्तु। गीतायामपि उक्तम् –

असंशयं महाबाहो, मनो दुर्निग्रहं चलम्

अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते॥

अतः कविवरः रवीन्द्रठाकुरमहाभागाः एतस्यां कवितायां मनसः विकासार्थम् ईश्वरं प्रति प्रार्थनां करोति।




मानसं मम विकसितं कुरु
मानसचर हे।

कुरु निर्मलम् उज्ज्वलम् अयि
चिर सुन्दर हे।

उद्यतम् अतिप्रबुद्धम् अपि
निर्भयं कुरु हे।

सुशिवम् अनलसम् अति
निःसंशयं कुरु हे।

आन्तरं मम विकसितं कुरु
आन्तरतर हे।

योजय मां निखिलसङ्गे
मुञ्च हे मम बन्धनम्।
सञ्चारय सकलकर्मसु
शान्तं तवच्छन्दः।

चरणपद्मे चित्तं मम
निष्पन्दितं कुरु हे।

कुरु नन्दितम्, अतिनन्दितम्,
अभिनन्दितम् हे।

आन्तरं मम विकसितं कुरु
आन्तरतर हे।

## अन्वयः

हे मानसचर मम मानसम् विकसितम् कुरु।

हे अयि चिर सुन्दर (मम मानसं) उज्ज्वलम् निर्मलम् कुरु।

हे उद्यतम् अतिप्रबुद्धम् अपि निर्भयम् कुरु।

हे सुशिवम् अनलसम् अति निःसंशयम् कुरु।

हे आन्तरतर मम आन्तरम् विकसितम् कुरु।

माम् निखिलसङ्गे योजय, मम बन्धनम् मुञ्च।

सकलकर्मसु सञ्चारय, शान्तम् तव छन्दः।

हे मम चित्तम् चरणपद्मे निष्पन्दितम् कुरु।

हे नन्दितम्, अतिनन्दितम्, अभिनन्दितम् कुरु।

हे आन्तरतर ! मम आन्तरम् विकसितम् कुरु।

# अनुप्रयोगः

1. द्वौ छात्रौ अधोलिखितान् शब्दान् अधिकृत्य अन्योन्यं श्रुतलेखं कारयताम् –

| | प्रथमः छात्रः | द्वितीयः छात्रः |
|---|---|---|
| क. | उज्ज्वलः | .............................. |
| ख. | .............................. | सञ्चारय |
| ग. | निःसंशयम् | .............................. |
| घ. | .............................. | मुञ्च |
| ङ | चरणपद्मे | .............................. |
| च. | निष्पन्दितं | .............................. |
| छ. | .............................. | निर्भयम् |
| ज. | .............................. | नन्दितम् |
| झ. | निखिलसङ्गे | .............................. |
| ञ. | अतिप्रबुद्धम् | .............................. |
| ट. | तवच्छन्दः | .............................. |
| ठ. | .............................. | निर्मलम् |
| ङ | .............................. | अभिनन्दितम् |
| ढ. | .............................. | बन्धनम् |
| ण. | उद्यतम् | .............................. |
| त. | .............................. | सुशिवम् |
| थ. | अनलसम् | .............................. |
| द. | .............................. | शान्तम् |

**2. अनलसम्, अप्रियः, अनुपस्थितः, अनेकः, अनृतम्, अनिच्छा, अशिक्षितः, असत्यम्, अविवेकः, अनीश्वरः, अनधीत्य, अस्वस्थः।**

उपरि नञ् तत्पुरुषस्य उदाहरणानि दत्तानि। 'अ' - अन् परिवर्तनम् अधिकृत्य पदानि पृथक् - पृथक् स्तम्भे लिखन्तु

'न' स्थाने 'अन्' भवति यदि परे शब्दस्य प्रथमवर्णः स्वरः भवति। यथा न उचितम्=अनुचितम्

'न' स्थाने 'अ' भवति यदि परे प्रथमः वर्णः व्यञ्जनं भवति। न सत्यम्=असत्यम्।

| | ***खण्डः 'अ'*** | ***खण्डः 'ब'*** |
|---|---|---|
| | यथा - अनलसम् | अप्रियः |
| (i) | .............................. | .............................. |
| (ii) | .............................. | .............................. |
| (iii) | .............................. | .............................. |
| (iv) | .............................. | .............................. |
| (v) | .............................. | .............................. |
| (vi) | .............................. | .............................. |
| (vii) | .............................. | .............................. |
| (viii) | .............................. | .............................. |

**3. अधस्तात् केषांचित् पदानां विग्रहाः समासनामानि च दीयन्ते। पाठं पठित्वा तेषां समस्तपदानि लिख्यन्ताम्**

| | ***विग्रहः*** | ***समासनाम*** | ***समस्तपदम्*** |
|---|---|---|---|
| क. | चरणौ पद्मे इव | कर्मधारयः | .............................. |
| ख. | निर्गतं मलं यस्मात् तत् | बहुव्रीहिः | .............................. |
| ग. | सकलेषु कर्मसु | कर्मधारयः | .............................. |
| घ. | निर्गतः संशयः यस्मात् तत् | बहुव्रीहिः | .............................. |
| ङ. | मानसे चरति | उपपदतत्पुरुषः | .............................. |

| | | | |
|---|---|---|---|
| च. | निर्गतं भयं यस्मात् तत् | बहुव्रीहिः | .............................. |
| छ. | निखिलानां सङ्घे | षष्ठीतत्पुरुषः | .............................. |
| ज. | निर्गतं स्पन्दितं यस्मात् तत् | बहुव्रीहिः | .............................. |

**4.अ. मञ्जूषायाः समुचितपदानां चयनं कृत्वा अधोदत्तशब्दानां प्रत्येकं पदस्य त्रीणि समानार्थकपदानि लिखन्तु**

| | | |
|---|---|---|
| शुद्धम् | मनः | वारिजम् |
| गतिहीनम् | भयरहितम् | अखिलम् |
| चित्तम् | पवित्रम् | प्रफुल्लितम् |
| निर्भीकम् | जलजम् | निश्चलम् |
| विकचम् | प्रमुदितम् | अन्तरम् |
| अम्बुजम् | सर्वम् | स्तब्धम् |
| सम्पूर्णम् | अभयम् | विमलम् |

| | | | | |
|---|---|---|---|---|
| क. | निर्मलम् | .............................. | .............................. | .............................. |
| ख. | मानसम् | .............................. | .............................. | .............................. |
| ग. | विकसितम् | .............................. | .............................. | .............................. |
| घ. | निर्भयम् | .............................. | .............................. | .............................. |
| ङ. | निष्पन्दितम् | .............................. | .............................. | .............................. |
| च. | पद्मम् | .............................. | .............................. | .............................. |
| छ. | निखिलम् | .............................. | .............................. | ............................ |

**ब. अधोलिखितेषु पदेषु सन्धिं सन्धिच्छेदं वा कृत्वा रिक्तस्थानानि पूरयत –**

| | | |
|---|---|---|
| क. | .............................. | उत् + ज्वलम् |
| ख. | सञ्चारय | .............................. + .............................. |

| | | |
|---|---|---|
| ग. | ............................ | तव + छन्दः |
| घ. | निः संशयम् | ............................ + ............................ |
| ङ. | ............................ | नि + स्पन्दितम् |

◦ 'मनः' पदे मूलशब्दः मनस् इति वर्तते ।

◦ 'मनस्' – 'पयस्' – 'तपस्' शब्दाः नपुंसकलिङ्गे सन्ति ।

◦ मनसः विशेषणपदानि अपि नपुंसकलिङ्गे सन्ति ।

यथा – उज्ज्वलं मनः, सुशिवं मनः, निर्भयं मनः ।

**5. मनसः पञ्चविशेषणानि पाठात् चित्वा लिखन्तु –**

क. ............................

ख. ............................

ग. ............................

घ. ............................

ङ. ............................

**6. अधोलिखितबङ्गलाशब्दानां तत्समसंस्कृतरूपाणि पाठात् चित्वा लिखत –**

| | **बङ्गलाभाषायाः शब्दाः** | **संस्कृतभाषायाः शब्दाः** |
|---|---|---|
| ***यथा*** | ***विकोशितो*** | ***विकसितम्*** |
| क. | ऑन्तॉरो | ............................ |
| ख. | मॉमो | ............................ |
| ग. | निश्पोन्दितो | ............................ |
| घ. | नोन्दितो | ............................ |
| ङ. | बॉन्धो | ............................ |
| च. | शॉकाल | ............................ |

छ. चित्तो ..............................

ज. उज्जॉलो ..............................

झ. उद्धॉतो ..............................

ञ. चॉरोणोपॉद्दे ..............................

## 7. पूर्णवाक्येन उत्तरत -

क. कविः आत्मानं कस्मिन् योजयितुम् इच्छति ?

ख. ईश्वरस्य छन्दः कीदृशम् अस्ति ?

ग. कस्य विकासार्थम् अत्र प्रार्थना क्रियते ?

घ. मम चित्तं कुत्र संलग्नं स्यात् ?

ङ कविः ईश्वरं किम् निर्भयं कर्तुं कथयति ?

## 8. मञ्जूषातः चित्वा अधोलिखितसारांशं पूरयत -

भक्तः हृदये निवसन्तं .............................. प्रार्थयते यत् हे अन्तर्यामिन् परमेश्वर ! मम सङ्कीर्णं .............................. विकसितं कुरु। तव कृपया .............................. उज्ज्वलं निर्भयं, .............................. निरतं, .............................. हीनम्, उद्योगपरं सन्देहरहितं, बन्धनमुक्तम्, उदारम् अतिसन्तुष्टं सर्वेषां ................ च भवतु। हे प्रभो मम .................. निजचरणकमले स्थिरं कुरु।

**मञ्जूषा**

मानसं, परमेश्वरं, शुभकर्मसु,

मनः, आलस्येन, प्रियं,

एतत्।

9. **आज्ञार्थे लोट् लकारः प्रयुज्यते। 'कृ' धातोः लोट् लकारे रूपाणि -**

| | ***एकवचनम्*** | ***द्विवचनम्*** | ***बहुवचनम्*** |
|---|---|---|---|
| *प्रथमः पुरुषः* | करोतु | कुरुताम् | कुर्वन्तु |
| *मध्यमः पुरुषः* | कुरु | कुरुतम् | कुरुत |
| *उत्तमः पुरुषः* | करवाणि | करवाव | करवाम |

**अधोलिखितवाक्येषु क्रियापदानां स्थाने लोट्लकारस्य क्रियापदानि लिखन्तु -**

क. हे आन्तरतर ! मम आन्तरं विकसितं कुर्याः।

.....................................................................................................................

ख. हे ईश्वर ! मम बन्धनं मुञ्चेः।

.....................................................................................................................

ग. प्रभो ! मां सकलकर्मसु सञ्चारयेः।

.....................................................................................................................

घ. भोः सृष्टिकर्तः ! मां निखिलसङ्गे योजयेः।

.....................................................................................................................

ङ हे मानसचर ! मम हृदयम् उज्ज्वलं कुर्याः।

.....................................................................................................................

## पाठ-विकासः

### 1.(क) कविपरिचयः

रवीन्द्रनाथठाकुरः श्रेष्ठः कविः कथाकारः, उपन्यासलेखकः, गीतकारः सङ्गीतरचनायां पटुः अभिनये कुशलः, नाटकरचनायां दक्षः, महान् शिक्षाविद् च आसीत्। तेन रचितगीतानां सङ्ख्या द्विसहस्रतः अपि अधिका अस्ति। स स्वयम् एव तेषां गीतानां स्वरलिपिं कृतवान्।

## ( ख ) काव्यपरिचयः

1913 तमे वर्षे तस्य 'गीताञ्जलिः' इति नाम्नी कृतिः नोबलपुरस्कारेण सम्मानिता अभवत्। अनेन पुरस्कारेण तस्य कीर्तिः सर्वेषु पश्चिमदेशेषु भारते च प्रसारम् अलभत।

### बंगीयभाषायाम् मूलगीतम्

ऑन्तॉरो मॉमो बिकोशितो कॉरो
ऑन्तॉरोतॉरो हे

निर्मॉलो कॉरो, उज्जॉलो कॉरो,
शुन्दोरो कॉरो हे

जाग्रोतो कॉरो, उद्धॉतो कॉरो,
निर्भॉरो कॉरो हे

मोंगोल कॉरो, निरॉलॉशो
निःशॉशाय कॉरो हे

जुक्तो कॉरो हे, शॉबार शॉंगे
मुक्तो कॉरो हे बॉन्धो

शॉन्चार कॉरो, शॉकाल कॉर्मे
शान्तो तोमार छॉन्दो

चॉरोणोपॉद्दे मॉमो चित्तो
निश्पोन्दितो कॉरो हे

नोन्दितो कॉरो, नोन्दितो कॉरो,
नोन्दितो कॉरो हे।

षष्ठः पाठः

# क्षमावीरो विजयते

**अस्माकं भारते प्रजातान्त्रिकं शासनम् अस्ति। अस्य शासनस्य चत्वारः प्रमुखाः स्तम्भाः सन्ति-स्वतन्त्रता, समानता, बन्धुता एवं न्यायः। भगवान् महावीरः सार्धद्विसहस्रवर्षाणि पूर्वम् एव एतेषां मूल्यानां प्रतिष्ठापनम् अकरोत्। भोगादिविषयेभ्यः निवृत्तिः, सर्वसत्त्वेभ्यः अभयदानं, तेषां दुःखनिवारणम्, अरिषु मित्रेषु च समभावः, सार्वभौमिके बन्धुत्वे विश्वासः, तर्कपूर्णः व्यवहारः इत्येतेषां जीवनमूल्यानां साक्षात् आदर्शभूतः एव अयं महापुरुषः। अस्य तपोमयजीवनं सर्वेभ्यः शिक्षाप्रदम्।**

धन्यः अयं भगवान् महावीरः यः लोककल्याणाय महान्ति कष्टानि अनुभवन् तपोमयं जीवनम् अयापयत्। अयं तपस्वी रिव्रष्टाब्दात् पूर्वं प्रायः पञ्चम्यां शताब्द्याम् आविरभूत्। अस्य पिता राजा सिद्धार्थः माता च त्रिशला आसीत्। बाल्यादेव बालमित्रैः सह विविधाः क्रीडाः कुर्वन्नपि कदापि दोषपूर्णम् आचरणं न कृतवान्। एकदा स भयङ्करविषधरात् स्वमित्राणि अरक्षत्। तस्मादेव क्षणात् अतुलितबलशाली एषः वर्धमानः महावीरः इति प्रसिद्धः अभवत्।

अयं महात्मा संसारस्य सारहीनतां जानन् अपि, संन्यासदीक्षाम् इच्छन् अपि मातापित्रोः अनुरोधेन विवाहम् अकरोत्। अष्टादशवर्षपर्यन्तं वैराग्यपूर्वकं गृहस्थधर्मं पालयतः तस्य पितरौ दिवं गतौ। ततः सर्वं राज्यलोभं परित्यज्य स्वाग्रजस्य अनुमत्या वनं प्राविशत् घोरतरं तपः च अतपत्। सुखदुःखे, मानापमानौ च तस्य कृते समौ आस्ताम्। असौ बहुवारं तस्करैः दुष्टैः च गृहीतः पीडितश्च। विविधैः वन्यैः पशुभिः दष्टः अपि स व्रतभङ्गम् न अकरोत्। द्वादशवर्षपर्यन्तं मौनम् अधारयत्। शनैः शनैः तस्य हृदयात् सर्वे विकाराः अपगताः। एवं कैवल्यज्ञानम् अनुभूय स अरिहन्ता (जीवन्मुक्तः) अभवत्। तदा लोककल्याणाय धर्मप्रचाराय च भारते स्थानात् स्थानम् अभ्रमत्।

एकदा कश्चन विद्याधरः महाराजचेटकस्य कनिष्ठां पुत्रीं चन्दनबालाम् अपहृत्य आपणे विक्रयणार्थम्

आनीतवान्। धर्मपरायणः एकः श्रेष्ठी तां कुलीनां मत्वा तस्याः मूल्यं प्रदाय गृहञ्च आनीय पुत्रीवत् अपालयत्। कालान्तरे स श्रेष्ठी विदेशं गतवान्। तस्य पत्नी चन्दनबालाम् अन्धप्रकोष्ठे अपातयत्, प्रतिदिनं च मृत्तिकापात्रे केवलं मुष्टिकामात्रम् ओदनं भोजनाय अयच्छत्। दैववशात् भगवान् महावीरः श्रेष्ठिनः गृहस्य पुरतः भिक्षार्थं गच्छति स्म।



चन्दनबाला स्वमृत्तिकापात्रे स्थितं सर्वम् ओदनं भगवते समर्पितवती। भगवान् आहारं स्वीकृत्य अग्रे गतवान्। मृत्तिकापात्रं तस्य स्पर्शमात्रेण स्वर्णपात्रम् अभवत्। एषः समाचारः सम्पूर्णवत्सदेशे प्रासरत्। वत्सदेशस्य पट्टमहिषी मृगावती अपि तं समाचारं श्रुत्वा तस्याः दर्शनार्थम् आगता, चन्दनबालां च दृष्ट्वा ज्ञातवती यत् सा तस्याः एव पूर्वापहृता भगिनी आसीत्। सा चन्दनबालां राजभवनम् अनयत् परन्तु चन्दनबाला अल्पे एव वयसि संसारस्य निस्सारताम् अनुभूय 'आर्यिका' अभवत्, अपि च तपोबलात् षट्त्रिंशत्सहस्राणाम् आर्यिकाणां संघस्य प्रमुखगणिनी जाता।

अहिंसायाः प्रचारं कुर्वन् भगवान् महावीरः न केवलं मानुषेषु अपितु पशुपक्षिषु वनस्पतिषु अपि हिंसायाः निषेधम् उपादिशत्। अस्य प्रमुखाः उपदेशाः सन्ति-सम्यग्दर्शनम्, सम्यग्ज्ञानम्, सम्यक् चरितम् च। इमे रत्नत्रयम् इति मन्यन्ते। तस्य मते आचार एव श्रेष्ठतायाः कारणम्। जीवेषु सर्वेषु दया कर्तव्या। न कश्चिद् गर्हणीयः। भोगाः दुःखदाः। क्षमया, धैर्येण, मनसः दमेन, इन्द्रियाणां निग्रहेण, शान्त्या च मनोविकारान् दूरीकृत्य कैवल्याय प्रयतनीयम्।

अन्ते द्विसप्ततितमे वयसि कार्त्तिकमासस्य अमावस्यायां (कृष्णां रात्रिमपि दीपानाम् आलोकेन प्रभामयीं कारयन्) एष 'पावा' नगर्यां निर्वाणम् आप्तवान्। अहिंसा परमो धर्मः इति तस्य उद्घोषः अद्यतावत् जनान् प्रेरयति प्रेरयिष्यति च।

संसारदावानलदाहनीरं,

सम्मोहधूलिहरणे समीरम् ।

मायारसादारणसारसीरम् ।

नमामि वीरं गिरिसारधीरम् ।।

## अनुप्रयोगः

1. **अधोलिखितशब्दान् उच्चैः पठत -**

मानापमानौ, समौ, तस्करैः, दुष्टैः, विविधैः, वन्यैः, मौनम्, शनैः शनैः, कैवल्यज्ञानम्, दैववशात्, धैर्येण ।

2. **अधोलिखितवाक्येषु सङ्ख्यावाचकपदैः रिक्तस्थानपूर्तिं कुर्वन्तु -**

(क) भगवान् महावीरः रिव्रष्टात् पूर्वं ........................ शताब्द्याम् आविरभूत् ।

(ख) ........................ वर्षपर्यन्तं महावीरः गृहस्थधर्मं पालितवान् ।

(ग) ........................ वर्षपर्यन्तं महावीरः मौनम् अधारयत् ।

(घ) चन्दनबाला ........................ आर्यिकाणां सङ्घस्य गणिनी जाता ।

(ङ) एतानि ........................ रत्नानि मन्यन्ते ।

(च) ........................ वयसि कार्त्तिकमासस्य अमावस्यायां निर्वाणं प्राप्तवान् ।

3. **पाठात् चित्वा अधोलिखितशब्दानां विलोमपदानि लिखत -**

| | | | |
|---|---|---|---|
| (क) सारयुक्ताम् | ........................ | (ङ) पृष्ठतः | ........................ |
| (ख) अनुजस्य | ........................ | (च) सुखदाः | ........................ |
| (ग) मानः | ........................ | (छ) आदौ | ........................ |
| (घ) आदाय | ........................ | (ज) प्रशंसनीयः | ........................ |

4. **विशेषणानि विशेष्यैः सह मेलयत -**

| *विशेषणानि* | *विशेष्याणि* |
|---|---|
| (क) महान्ति | (i) वयसि |
| (ख) तस्मिन् | (ii) उपदेशाः |

| | | | |
|---|---|---|---|
| (ग) | मुष्टिकामात्रम् | (iii) | रात्रिम् |
| (घ) | अल्पे | (iv) | कष्टानि |
| (ङ) | परमः | (v) | काले |
| (च) | प्रमुखाः | (vi) | धर्मः |
| (छ) | पट्टमहिषी | (vii) | ओदनम् |
| (ज) | कृष्णाम् | (viii) | मृगावती |

**5. क्त्वा/ल्यप् प्रत्ययस्य प्रयोगेण वाक्यद्वयं योजयत –**

(क) अ. कश्चित् श्रेष्ठी चन्दनबालां कुलीनां मन्यते।

आ. कश्चित् श्रेष्ठी मूल्यं प्रदाय तां गृहं नीतवान्।

(ख) अ. मृगावती चन्दनबालां पश्यति।

आ. मृगावती ज्ञातवती यत् चन्दनबाला तस्याः एव भगिनी आसीत्।

(ग) अ. मृगावती समाचारं शृणोति।

आ. मृगावती चन्दनबालायाः दर्शनार्थं गच्छति।

(घ) अ. महावीरः राज्यलोभं परित्यजति।

आ. महावीरः स्वाग्रजस्य अनुमत्या वनं गच्छति।

(ङ) अ. महावीरः कैवल्यज्ञानम् अनुभवति।

आ. महावीरः अरिहन्ता अभवत्।

(च) अ. महावीरः आहारं स्वीकृतवान्।

आ. महावीरः अग्रे गच्छति।

**6. अधोलिखितक्रियापदेषु 'क्तवतु' प्रत्ययस्य स्थाने लङ्लकारस्य, लङ्लकारे प्रयुक्तानां क्रियापदानां स्थाने 'क्तवतु' प्रत्ययस्य प्रयोगः क्रियताम् –**

| | | *भूतकालिकक्रियापदानि* | *'क्तवतु' प्रत्ययान्तपदानि* |
|---|---|---|---|
| (क) | यथा | अयापयत् | यापितवान् |
| (ख) | | ............. | कृतवान् |
| (ग) | | अभवत् | ............. |

| | | |
|---|---|---|
| (घ) | ............. | तप्तवान् |
| (ङ) | ............. | आनीतवान् |
| (च) | अयच्छत् | ............. |
| (छ) | ............. | गतवान् |
| (ज) | अजानात् | ............. |
| (झ) | प्राप्नोत् | ............. |
| (ञ) | ............. | प्रसृतवान् |

**7. अधोलिखितेषु एकं कथनम् अशुद्धम् अस्ति। तत् कथनं चिह्नीकुरुत –**

(क) भगवान् महावीरः पशुपक्षिषु अपि हिंसायाः निषेधम् अकरोत्।

(ख) चन्दनबाला वत्सदेशस्य पट्टमहिषीमृगावत्याः भगिनी आसीत्।

(ग) सम्यग्दर्शनम्, सम्यक्पूजनं, सम्यक्चरित्रं च रत्नत्रयम् आसीत्।

(घ) श्रेष्ठिनः पत्नी चन्दनबालां प्रति सम्यक् व्यवहारं न करोति स्म।

(ङ) विकारहीनः भूत्वा स कैवल्यज्ञानं प्राप्तवान्।

**8. अधोलिखितशिक्षासु रिक्तस्थानपूर्त्तिं कुरुत –**

(क) भगवतः महावीरस्य मते .................. एव श्रेष्ठतायाः कारणम्।

(ख) जीवेषु .................. कर्तव्या।

(ग) मनुष्येण .................. दूरीकृत्य कैवल्याय प्रयतनीयम्।

(घ) वनस्पतिषु अपि स .................. निषेधम् अकरोत्।

(ङ) .................. दुःखं प्रयच्छन्ति।

(च) नरः .................. लिप्तः न भवेत्।

**9. अधोलिखितभावार्थे रिक्तस्थानपूर्त्तिः क्रियताम् –**

अहं भगवन्तं महावीरं .................. यः संसाररूपिदावाग्नेः दाहं दूरीकर्तुं जलम् इव अस्ति, यः सम्मोहस्य धूलिं निवारयितुं .................. , यः च मायारूपिपृथ्वीं विदारयितुम् .................. एव अस्ति, यश्च पर्वतसमं .................. अस्ति।

**10. अधोलिखितवाक्यानि कथाक्रमेण पुनः लिखत -**

(क) महावीरः द्वादशवर्षपर्यन्तं मौनम् अधारयत्।

(ख) महावीरः स्वाग्रजस्य अनुमत्या वनं प्राविशत्।

(ग) चन्दनबाला षट्त्रिंशत्सहस्राणाम् आर्यिकाणां संघस्य प्रमुखगणिनी जाता।

(घ) महावीरः पावानगर्यां निर्वाणम् आप्तवान्।

(ङ) महावीरस्य पिता राजा सिद्धार्थः आसीत्।

(च) भगवान् महावीरः खि्रष्टात् पूर्वं पञ्चम्यां शताब्द्याम् आविरभूत्।

(छ) महावीरः चन्दनबालायाः उद्धारम् अकरोत्।

(ज) महावीरः कैवल्यज्ञानं प्राप्य प्रचारकार्ये संलग्नः अभवत्।

## पाठविकासः

**क. सम्यक्त्वम् इति किम् ?**

तत्त्वरुचिः सम्यक्त्वं, तत्त्वप्रख्यापकं भवेज्ज्ञानम्।

पापक्रियानिवृत्तिश्चरित्रमुक्तं जिनेन्द्रेण। (ज्ञानार्णवः पृ. 91)

(i) सम्यक् दर्शनम् तत्त्वं प्रति श्रद्धा।

(ii) सम्यक् ज्ञानम् तत्त्वस्य परमसत्यस्य ज्ञानं, विवेकबुद्धिः।

(iii) सम्यक् चरितम् पापकर्मभ्यः निवृत्तिः, शुद्धाचरणम्।

**ख. अहिंसा**

हिंसैव दुर्गतेर्द्वारं, हिंसैव दुरितार्णवः।
हिंसैव नरकं घोरं, हिंसैव गहनं तमः॥

यत्किञ्चित्संसारे शरीरिणां दुःखशोकभयबीजम्।
दौर्भाग्यादिसमस्तं तद्धिंसासम्भवं ज्ञेयम्॥ (ज्ञानार्णवः पृ. 120)

**ग. कैवल्यम्/केवलज्ञानम्**

मोक्षः - आत्मनः चरमविकासः। जन्ममरणबन्धनाद् मुक्तिः।

# महाजनो येन गतः स पन्थाः

**महाकवीनां काव्येषु सुभाषितानाम् अपूर्वः कोषः भवति। यथा विविध-वर्णपुष्पाणां शोभया विभूषितम् उपवनं लोकानां चित्तं बलाद् आकर्षति तथा सत्कवीनां काव्येभ्यः सङ्कलितानि पद्यरत्नानि सहृदयानां पाठकानां मनांसि रञ्जयन्ति।**

**अस्मिन् पाठे पुण्यभूमेः भारतस्य वन्दना, विद्यायाः उपयोगिता, समयस्य महिमा, परोपकारस्य गरिमा, सांसारिकानां पदार्थानाम् असारता, सज्जनदुर्जनानां प्रकृतिविभेदः, धर्मस्य गहनता, महापुरुषाणां मार्गानुसरणस्य श्रेष्ठता च प्रतिपादिता अस्ति।**

1. *गायन्ति देवाः किल गीतकानि*
*धन्यास्तु ते भारतभूमिभागे।*
*स्वर्गापवर्गास्पदमार्गभूते*
*भवन्ति भूयः पुरुषाः सुरत्वात्॥*

***अन्वयः-*** देवाः किल गीतकानि गायन्ति। ते पुरुषाः तु धन्याः (ये) स्वर्गापवर्गास्पदमार्गभूते भारतभूमिभागे सुरत्वात् भूयः भवन्ति।

2. *विद्या समुन्नतिपथं विशदीकरोति*
*बुद्धिं विचारविषये प्रखरीकरोति।*
*कर्तव्यपालनपरां धियमादधाति*
*विद्या सखा परमबन्धुरथेह लोके॥*

***अन्वयः-*** विद्या समुन्नतिपथम् विशदीकरोति, विचारविषये बुद्धिम् प्रखरीकरोति, कर्तव्यपालनपराम् धियम् आदधाति, इह लोके विद्या सखा अथ परमः बन्धुः।

3. ***नष्टं द्रव्यं प्राप्यते ह्युद्यमेन***
***नष्टा विद्या प्राप्यतेऽभ्यासयुक्त्या ।***

***नष्टारोग्यं सूपचारैः सुसाध्यं***
***नष्टा वेला या गता सा गतैव ॥***

***अन्वयः***- नष्टम् द्रव्यम् हि उद्यमेन प्राप्यते, नष्टा विद्या अभ्यासयुक्त्या प्राप्यते । नष्टारोग्यम् सूपचारैः सुसाध्यम्, या नष्टा वेला गता सा गता एव ॥

4. ***पद्मकरं दिनकरो विकचीकरोति***
***चन्द्रो विकासयति कैरवचक्रवालम् ।***

***नाभ्यर्थितो जलधरोऽपि जलं ददाति***
***सन्तः स्वयं परहितेषु कृताभियोगाः ॥***

***अन्वयः***- दिनकरः नाभ्यर्थितः (सन् अपि) पद्माकरम् विकचीकरोति, चन्द्रः कैरवचक्रवालम् विकासयति, जलधरः नाभ्यर्थितः अपि जलम् ददाति, सन्तः स्वयम् परहितेषु कृताभियोगाः (भवन्ति) ।

5. ***भोगा न भुक्ताः वयमेव भुक्ताः***
***तपो न तप्तं वयमेव तप्ताः ।***

***कालो न यातो वयमेव याताः***
***तृष्णा न जीर्णा वयमेव जीर्णाः ॥***

***अन्वयः***- भोगाः न भुक्ताः वयम् एव भुक्ताः, तपः न तप्तम् वयम् एव तप्ताः । कालः न यातः वयम् एव याताः, तृष्णा न जीर्णा वयम् एव जीर्णाः ।

6. ***कटु क्वणन्तो मलदायकाः खलाः***
***तुदन्त्यलं बन्धनशृङ्खला इव ।***

***मनस्तु साधुध्वनिभिः पदे पदे***
***हरन्ति सन्तो मणिनूपुरा इव ॥***

***अन्वयः***- कटु क्वणन्तः मलदायकाः खलाः बन्धनशृङ्खला इव अलम् तुदन्ति । सन्तः मणिनूपुराः इव साधुध्वनिभिः पदे पदे मनः हरन्ति ।

7. ***तर्कोऽप्रतिष्ठः श्रुतयो विभिन्नाः***
***नैको मुनिर्यस्य मतं प्रमाणम् ।***
***धर्मस्य तत्त्वं निहितं गुहायाम्***
***महाजनो येन गतः स पन्थाः ॥***

***अन्वयः***- तर्कः अप्रतिष्ठः श्रुतयः विभिन्नाः एकः मुनिः न यस्य मतम् प्रमाणम् । धर्मस्य तत्त्वम् गुहायाम् निहितम्, येन महाजनः गतः सः पन्थाः ।

## *अनुप्रयोगः*

**1. अधोलिखितान् शब्दान् उच्चैः पठत, सञ्चिकायां च लिखत -**

क. तर्कोऽप्रतिष्ठः, प्राप्यतेऽभ्यासयुक्त्या, जलधरोऽपि
ख. अभ्यर्थितः, ह्युद्यमेन, परमबन्धुरथेह

**2. 'अ' स्तम्भस्य श्लोकांशाः 'ब' स्तम्भस्य श्लोकांशैः सह संयोज्यन्ताम् -**

| | *अ* | *ब* |
|---|---|---|
| क. | गायन्ति देवाः किल गीतकानि | नष्टा वेला या गता सा गतैव । |
| ख. | विद्या समुन्नतिपथं विशदीकरोति | महाजनो येन गतः स पन्थाः । |
| ग. | नष्टारोग्यं सूपचारैः सुसाध्यं | सन्तः स्वयं परहितेषु कृताभियोगाः । |
| घ. | कटु क्वणन्तो मलदायकाः खलाः | बुद्धिं विचारविषये प्रखरीकरोति । |
| ड. | नाभ्यर्थितो जलधरोऽपि जलं ददाति | तृष्णा न जीर्णा वयमेव जीर्णा । |
| च. | धर्मस्य तत्त्वं निहितं गुहायां | तुदन्त्यलं बन्धनशृङ्खला इव । |
| छ. | कालो न यातो वयमेव याताः | धन्यास्तु ते भारतभूमिभागे । |

**3. अधोलिखितेषु पदेषु सन्धिं सन्धिच्छेदं वा कृत्वा रिक्तस्थानानि पूरयत -**

| | | |
|---|---|---|
| क. | .................................. | प्राप्यते + अभ्यासयुक्त्या |
| ख. | जलधरोऽपि | ............... + ................... |
| ग. | .................................. | धन्याः + तु |

| | | |
|---|---|---|
| घ. | तर्कोऽप्रतिष्ठः | .............. + .................. |
| ङ | ................................. | परमबन्धुः + अथ + इह |
| च. | नैकोमुनिर्यस्य | ....... + ....... + ....... + ....... |
| छ. | ................................ | तुदन्ति + अलम् |
| ज. | मनस्तु | .............. + ................... |

## 4. पाठात् विचित्य समस्तपदानि रचयत –

| | *विग्रहः* | *समस्तपदम्* | *समासनाम* |
|---|---|---|---|
| क. | भारतभूमेः भागः | ................................ | षष्ठीतत्पुरुषः |
| ख. | दिनं करोति इति | ................................ | उपपदतत्पुरुषः |
| ग. | साधुभिः ध्वनिभिः | ................................ | कर्मधारयः |
| घ. | महान् जनः | ................................ | कर्मधारयः |
| ङ | कर्तव्यस्य पालने परां ताम् | ................................ | सप्तमीतत्पुरुषः |
| च. | बन्धनाय शृङ्खला | ................................ | चतुर्थीतत्पुरुषः |
| छ. | मणिजटिताः नूपुराः | ................................ | मध्यमपदलोपी तत्पुरुषः |
| ज. | परेषां हितेषु | ................................ | षष्ठीतत्पुरुषः |

## 5. अधोलिखितानां वाक्यानां कर्तृवाच्ये परिवर्तनं कुर्वन्तु –

| | *कर्मवाच्ये* | *कर्तृवाच्ये* |
|---|---|---|
| | *यथा–देवैः गीतकानि गीयन्ते ।* | *देवाः गीतकानि गायन्ति ।* |
| क. | विद्यया समुन्नतिपथः विशदीक्रियते । | ............................................... |
| ख. | दिनकरेण पद्माकरः विकचीक्रियते । | ............................................... |
| ग. | चन्द्रेण कैरवचक्रवालः विकास्यते । | ............................................... |
| घ. | जलधरेण जलं दीयते । | ............................................... |

ङ मलदायकैः खलैः सज्जनाः तुद्यन्ते । ..............................................

च. सद्भिः मनः ह्रियते । ..............................................

## 6.( अ ) पाठात् उपयुक्तानि पदानि चित्वा अधोलिखिततालिकायां रिक्तस्थानानि पूरयन्तु –

| | *विशेषणपदानि* | *विशेष्यपदानि* |
|---|---|---|
| क. | नष्टम् | ............................ |
| ख. | ............................ | भोगाः |
| ग. | याताः | ............................ |
| घ. | ............................ | तृष्णा |
| ङ | मलदायकाः | ............................ |
| च. | ............................ | श्रुतयः |
| छ. | नष्टा | ............................ |
| ज. | ............................ | तपः |

## 6.( ब ) विलोमपदानि पाठात् चित्वा लिखत –

| | *पदानि* | *विलोमपदानि* |
|---|---|---|
| क. | दानवाः | ............................ |
| ख. | अधर्मः | ............................ |
| ग. | नरकम् | ............................ |
| घ. | मधुरम् | ............................ |
| ङ | दुर्जनः | ............................ |
| च. | अकर्तव्यम् | ............................ |

7. **प्रश्नान् उत्तरत –**

क. धर्मस्य तत्त्वं कुत्र निहितम् अस्ति ?

ख. का जीर्णा न भवति ?

ग. सज्जनाः कथं मनः हरन्ति ?

घ. कः स्वयम् एव जलं ददाति ?

ङ. नष्टारोग्यं कैः सुसाध्यं भवति ?

च. विद्या किं करोति ?

8. **अधोलिखिताः सूक्तीः पठित्वा समभावसूक्तयः पाठात् विचित्य तत्समक्षं लिखत –**

क. दुर्लभं भारते जन्म मानुष्यं तत्र दुर्लभम् ।

.......................................................................................................................

ख. गतः कालः कृते प्रयत्नेऽपि पुनः न आयाति ।

.......................................................................................................................

ग. अयाचितः अपि मेघः जलं ददाति ।

.......................................................................................................................

घ. सः तु भवति दरिद्रः यस्य तृष्णा विशाला ।

.......................................................................................................................

ङ विद्या बन्धुः विदेशगमने ।

.......................................................................................................................

च. परोपकाराय सतां विभूतयः ।

.......................................................................................................................

**9. अन्वयं पूरयत -**

क. देवाः किल .................................. गायन्ति। ते पुरुषाः तु .............................. (ये) स्वर्गापवर्गास्पदमार्गभूते ............................ सुरत्वात् भूयः भवन्ति।

ख. तर्कः ........................ श्रुतयः विभिन्नाः, एकः मुनिः न यस्य .................... प्रमाणम्। धर्मस्य तत्त्वं गुहायां ................, येन महाजनः गतः स पन्थाः।

ग. विद्या समुन्नतिपथं ...................... करोति विचारविषये ............... प्रखरीकरोति, कर्तव्यपालनपरां धियम् आदधाति, इह लोके ................ सखा अथ परमः बन्धुः।

**10. पाठगतश्लोकानां भावस्पष्टीकरणम् उचितपदैः कुर्वन्तु -**

क. संसारे ...................................... अपि सन्ति दुर्जना अपि। तयोः व्यवहारे महान् भेदः। ......................... कटु भाषन्ते कुव्यवहारं च कुर्वन्ति। ते ...................... इव मानवं पीडयन्ति किन्तु सज्जनाः मणिनूपुराः इव भवन्ति। ते .................... वदन्ति प्रियं च कुर्वन्ति।

ख. .................. इयं प्रकृतिः भवति यत् ते स्वयम् एव परेषां हितम् आचरन्ति। सूर्यः स्वयमेव .................... विकासयति। ............ स्वकिरणैः कुमुदानां विकासं करोति। मेघाः स्वयमेव .............. कृत्वा लोकस्य उपकारं कुर्वन्ति।

ग. जीवनकालः स्वल्पः किन्तु .......................... अनन्ताः। ते अस्मिन् स्वल्पकाले भोक्तुं न शक्यन्ते। तपः अपि ............... न शक्यते। आयुषः अन्तः भवति न तु कालस्य। वयं ............... भवामः किन्तु तृष्णा सदा तरुणी तिष्ठति। एतद् ....................... मानवजीवनस्य सत्यम्।

# पाठविकासः

**क. पाठे सङ्कलितानां सुभाषितानां सन्दर्भाः**

| ***श्लोकसङ्ख्या*** | ***सन्दर्भग्रन्थाः*** |
|---|---|
| 1. | विष्णुपुराणम् |
| 2. | वैद्यकीयसुभाषिताम् |

| | |
|---|---|
| 3. | नीतिशतकम् |
| 4. | वैराग्यशतकम् |
| 5. | कादम्बरीमुखम् |
| 6. | महाभारतम् |

## ख. समानान्तरसूक्तय:

- विद्या मित्रं प्रवासेषु। *(चाणक्यनीति: 5/15)*
- लोभेन बुद्धिश्चलति, लोभो जनयते तृषाम्
  तृषार्तो दु:खमाप्नोति, परत्रेह न मानव: ।। *(हितोपदेश: मित्रलाभ: /140)*
- स तु भवति दरिद्रो यस्य तृष्णा विशाला
  मनसि च परितुष्टे कोऽर्थवान् को दरिद्र: ।। *(वैराग्यशतकम् /45)*
- व्यर्थ: कालातिपातो न, कर्तव्यश्चतुरैर्नरै:
  गत: काल: प्रयत्नेऽपि, पुनर्नायाति कर्हिचित् ।।

## 'च्वि' प्रत्यय:

'च्वि' प्रत्यय: अभूततद्भावार्थक:। यद् वस्तु पूर्वं यस्मिन् रूपे न आसीत्, किन्तु सम्प्रति तत् परिवर्तितं रूपं धारयति, एतस्य बोधनाय 'च्वि' प्रत्यय: प्रयुज्यते ।

एष: प्रत्यय: 'कृ-भू-अस्' धातूनाम् एव योगे भवति। प्रक्रियायां प्रत्यय: लुप्त: भवति। पूर्वपदस्य अन्तिम: अकार: आकार: वा ईकाररूपं धारयति। पूर्वपदस्य अन्ते यदि स्वरा: भवन्ति ते दीर्घा: जायन्ते ।

### उदाहरणानि

| | | |
|---|---|---|
| अकृष्ण: कृष्ण: क्रियते | = | कृष्णीक्रियते |
| (कृष्ण + च्वि + क्रियते | = | कृष्ण + ई + क्रियते) |
| अविशदं विशदं करोति | = | विशदीकरोति |
| अप्रखरं प्रखरं करोति | = | प्रखरीकरोति |
| अविकचं विकचं करोति | = | विकचीकरोति |

अष्टमः पाठः

# गुरूपदेशः अजलं स्नानम्

उज्जयिनी नगरे तारापीडः नाम एकः नृपः आसीत्। तस्य महामात्यः शुकनासः परमविद्वान् नीतिज्ञः च आसीत्। चन्द्रापीडः तु राज्ञः ज्येष्ठः पुत्रः अभवत्। यदा सः विद्याध्ययनं समाप्य प्रतिनिवृत्तः तदा राजा तस्य युवराजपदे अभिषेकं कर्त्तुम् ऐच्छत्। सः अभिषेकसामग्रीं सङ्ग्रहीतुं द्वारपालान् आदिशत्। यौवराज्याभिषेकात् पूर्वं राजकुमारः चन्द्रापीडः दर्शनार्थम् आचार्यं शुकनासम् उपगतः। तदा आचार्यः शुकनासः अवदत्-''यद्यपि त्वम् अधीतशास्त्रः, ज्ञेयस्य च ज्ञाता असि, अल्पः अपि उपदेशः ते न अपेक्षते, तथापि नवयौवनस्य, राज्यसुखस्य, लक्ष्म्याः च मदः दारुणः भवति। अतः सम्प्रति त्वम् मद्वचनानि सावधानतया शृणु।'' ततः आचार्यः शुकनासः तस्य शुभम् इच्छन् तम् सस्नेहम् उपदिष्टवान्। एषः शुकनासोपदेशः 'कादम्बरी' इति ग्रन्थे प्रसिद्धः।



तात चन्द्रापीड ! गुरूपदेशश्च नाम पुरुषाणाम् अखिलमलप्रक्षालनक्षमम् अजलं स्नानम्। अयमेव ते कालः उपदेशस्य। भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। विशेषेण राज्ञाम्। विरला हि तेषामुपदेष्टारः। अहङ्कारमूला हि राजप्रकृतिः। प्रतिशब्दक इवानुगच्छति राजवचनम् जनो भयात्। अपि च जन्मजातम् ऐश्वर्यम्, अभिनवयौवनत्वम्, अप्रतिमरूपत्वञ्चेति महतीयं खल्वनर्थपरम्परा सर्वा।

आलोकयतु तावत् कल्याणाभिलाषी भवान् लक्ष्मीमेव प्रथमम्। इयं हि लब्धापि दुःखेन परिपाल्यते। न परिचयं रक्षति। नाभिजनमीक्षते। न कुलक्रमम् अनुवर्तते, न शीलं पश्यति, नाचारं परिपालयति, न सत्यम् अनुबुध्यते, न वैदग्ध्यं गणयति। विनीतं पातकिनमिव नोपसर्पति। तरङ्गबुद्बुदवत् हि चञ्चला। यथा यथा चेयं चपला दीव्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलम् उद्वमति।

कुमार ! राज्यतन्त्रेऽस्मिन् महामोहकारिणि यौवने तथा प्रयतेथाः यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः, न वञ्च्यसे धूर्तैः।

कामं भवान् प्रकृत्यैव धीरः, पित्रा च महता प्रयत्नेन समारोपितसंस्कारः। तथापि भवद्गुणसन्तोषः मामेवं मुखरीकृतवान्। "सर्वथा कल्याणैः पित्रा क्रियमाणम् अनुभवतु भवान् नवयौवराज्याभिषेकमङ्गलम्।"

## अनुप्रयोगः

**1. अधोलिखितपदानि शुद्धोच्चारणपूर्वकम् उच्चैः पठत –**

गुरूपदेशश्च, तेषामुपदेष्टारः, प्रकृत्यैव, कल्याणाभिलाषी, ऐश्वर्यम्, सुहृद्भिः

**2.(क) वर्णवियोजनं क्रियताम् –**

यथा रक्षति – र् + अ + क् + ष् + अ + त् + इ

प्रथमम् –

मङ्गलम् –

पित्रा –

**(ख) वर्ण-संयोजनं क्रियताम् –**

यथा – च् + अ + ञ् + च् + अ + ल् + आ = चञ्चला

– त् + अ + र् + अ + ङ् + ग् + अः = .......................

– स् + अ + र् + व् + आ = .......................

– र् + आ + ज् + ञ् + आ + म् = ......................

**3. अधः सन्धिरहितपदानां सन्धियुक्तानि रूपाणि लिखत –**

| | | | | |
|---|---|---|---|---|
| यथा – गुरु | + | उपदेशः | = | गुरूपदेशः |
| कल्याण | + | अभिलाषी | = | .................. |
| लब्धा | + | अपि | = | .................. |
| न | + | आचारम् | = | .................. |
| महती | + | इयम् | = | .................. |
| भाजनानि | + | उपदेशानाम् | = | .................. |
| खलु | + | अनर्थपरम्परा | = | .................. |
| च | + | इयम् | = | .................. |
| दीपशिखा | + | इव | = | .................. |

**4. अधः प्रदत्तविग्रहपदानां स्थाने समस्तपदानि पाठादेव चित्वा लिखत –**

| ***विग्रहपदानि*** | ***समस्तपदानि*** |
|---|---|
| यथा – अखिलं मलम् = अखिलमलम् | अखिलमलम् |
| प्रक्षालने क्षमम् | .................................. |
| कुलस्य क्रमम् | .................................. |
| अनर्थानाम् परम्परा | .................................. |
| दीपस्य शिखा इव | .................................. |
| राज्ञाम् प्रकृतिः | .................................. |
| अहङ्क.ारः एव मूलम् यस्याः सा | .................................. |
| कज्जलम् इव मलिनम् | .................................. |
| नवं यौवराज्यम् नवयौवराज्यस्य अभिषेकस्य मङ्गलम् | .................................. |

**5. विनयः विनीता च परस्परं वार्तालापं कुरुतः। विनयः कर्तृवाच्ये वदति विनीता च कर्मवाच्ये भाववाच्ये वा। अत्र उदाहरणम् अनुसृत्य विनीतायाः कथनानि लिखत –**

यथा – विनयः – विनीते ! किं तत्र आदित्यः वेदम् पठति ?

विनीता – आम्, आदित्येन वेदः पठ्यते।

विनयः – किं त्वम् अत्र लेखम् लिखसि ?

| | | |
|---|---|---|
| विनीता | – | आम्, अत्र मया लेखः लिख्यते। |
| विनयः | – | किं त्वम् विद्यालयं न गच्छसि ? |
| विनीता | – | नहि ........... .............. न ................ । |
| विनयः | – | किं गुरुः माम् धिक्करोति ? |
| विनीता | – | नहि, .......... ............. न ................. । |
| विनयः | – | किम् बालाः माम् उपहसन्ति ? |
| विनीता | – | नहि, .......... ............. न .................। |
| विनयः | – | किम् मित्राणि माम् निन्दन्ति? |
| विनीता | – | नहि, .......... ............. न .................। |
| विनयः | – | धन्यवादः। अधुना अहम् पादपान् सिञ्चामि। |
| विनीता | – | अस्तु, ......... अपि ............ सिच्यन्ते। |

## 6. निर्दिष्टशब्दरुपैः वाक्यपूर्तिं कुरुत –

यथा – <u>अयम्</u> एव कालः उत्सवस्य। (इदम् – प्रथमा)

(क) अस्य उत्सवस्य .................. सज्जा दर्शनीया। (सर्व – प्रथमा)

(ख) ............ अपि आलोकयतु शोभाम्। (भवत् – प्रथमा)

(ग) हे मित्र ! .................उत्सवपथम् निर्दिशतु। (अस्मद् – द्वितीया)

(घ) ....................... रमणीया वेला समारोहस्य। (इदम् – प्रथमा)

(ङ) अत्र .......................... अपि मया सह उपविश। (युष्मद् – प्रथमा)

## 7. निर्दिष्टधातुरूपैः वाक्यानि पूरयत –

यथा – नृपः प्रजाः <u>पालयति</u>। (पाल् – लट्)

(क) सैनिकाः देशं ........., ................... (रक्ष् – लट्)

(ख) राजसत्तायाः मदं को न .......................... (ज्ञा – लट्)

(ग) राज्ञाम् उपदेष्टारः विरलाः एव ......................... (भू – लट्)

(घ) मूर्खः विद्वांसम् न .............................. (गण् – लट्)

(ङ) राजकुमारः गुरोः उपदेशं .......................... (श्रु - लट्)

(च) अहम् प्रसन्नः .......................... (अस् - लट्)

(छ) त्वम् विजयी .......................... (भू - लोट्)

(ज) वयम् सदा जनहितम् एव .......................... (कृ - लृट्)

## 8. अधोलिखितप्रश्नानाम् उत्तरणि संस्कृतभाषया लिख्यन्ताम् -

(क) पुरुषाणाम् अखिलमलप्रक्षालने समर्थः कः भवति ?

(ख) राजप्रकृतिः कीदृशी भवति ?

(ग) लब्धापि दु:खेन का परिपाल्यते ?

(घ) लक्ष्मीः किमिव चञ्चला भवति ?

(ङ) लक्ष्मीः दीपशिखेव किम् उद्वमति ?

(च) जनः भयात् राजवचनं किमिव अनुगच्छति ?

(छ) पित्रा च समारोपितसंस्कारः कः आसीत् ?

(ज) आचार्यः शुकनासः युवराजाय कां शुभकामनाम् अयच्छत् ?

(झ) अयं पाठः कस्माद् ग्रन्थात् सङ्गृहीतः, कश्च तस्य लेखकः ?

## 9. पदानाम् अर्थमेलनं क्रियताम् -

| | *अ* | | *आ* |
|---|---|---|---|
| | ***पदानि*** | | ***अर्थाः*** |
| यथा | *अखिलम्* | | *सकलम्* |
| (क) | भाजनानि | (i) | विद्वत्ताम् |
| (ख) | प्रतिशब्दकः | (ii) | कुलीनम् |
| (ग) | अभिजनम् | (iii) | पात्राणि |
| (घ) | वैदग्ध्यम् | (iv) | कल्याणम् |
| (ङ) | सुहृद्भिः | (v) | प्रतिध्वनिः |
| (च) | मङ्गलम् | (vi) | मित्रैः |

**10. कथयन्तु 'आम्' अथवा 'न'**

(क) चन्द्रापीडः तारापीडस्य ज्येष्ठः पुत्रः आसीत् ।

(ख) चन्द्रापीडः मूर्खः आसीत् ।

(ग) गुरोः उपदेशः अजलं स्नानं कथ्यते ।

(घ) राज्ञां स्वभावः अहङ्कारयुक्तः भवति ।

(ङ) प्राप्ता लक्ष्मीः सुखेन रक्ष्यते ।

(च) लक्ष्मीः दीपशिखेव कज्जलं न मुञ्चति ।

(छ) आचार्यः शुकनासः यौवराज्याभिषेकात् पूर्वं चन्द्रापीडम् उपदिष्टवान् ।

(ज) चन्द्रापीडः तु गुरुणा समारोपितसंस्कारः आसीत् ।

**11.(क) समक्षम् कोष्ठकाद् विशेषणपदं चित्वा रिक्तस्थानं पूरयत**

(i) .................... ऐश्वर्यम् । (राज्ञः / जन्मजातम्)

(ii) .............................. यौवनत्वम् । (अभिनवम् / चन्द्रापीडस्य)

(iii) पिता पुत्रं ........................ प्रयत्नेन संस्कारयुक्तम् अकरोत् । (उपदेशं दत्त्वा / महता)

**(ख) रेखाङ्कितं सर्वनामपदं कस्मै प्रयुक्तम् ?**

(i) अयमेव <u>ते</u> कालः उपदेशस्य । ..........................

(ii) विरलाः हि <u>तेषाम्</u> उपदेष्टारः । ..........................

(iii) <u>इयम्</u> हि लब्धापि दुःखेन परिपाल्यते । ..........................

**(ग)** यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ।।
इति श्लोकस्य भावमूला का पङ्क्तिः विद्यते पाठे ? पठित्वा अवबुध्य च लिखत ।

**12. द्वितीये अनुच्छेदे लक्ष्म्याः दोषाः वर्णिताः । तेषु केवलं पञ्चदोषान् अत्र वर्णयत**

यथा लक्ष्मीः परिचयं न रक्षति ।

(i) ......................................................................

(ii) ..................................................................

(iii) ..................................................................

(iv) ..................................................................

(v) ..................................................................

# पाठविकासः

## (क) लेखकपरिचय :

महाकविः बाणभट्टः राज्ञः हर्षवर्धनस्य राज्यकविः आसीत्। हर्षवर्धनस्य शासनकालः 606 ईसवीतः 648 ई॰ पर्यन्तम् आसीत्। हर्षवर्धनः कन्नौजस्य राजा अभवत्। अतः सप्तमशताब्द्याः पूर्वार्द्धे बाणस्य स्थिति कालः मन्यते। अयं वत्सगोत्रोत्पन्नः द्विजः आसीत्। अस्य पिता चित्रभानुः माता च राज्यदेवी आस्ताम्। दुर्भाग्येन असौ बाल्यावस्थायामेव मातृपितृविहीनः जातः। ततः सः देशाटनाय निर्गतः। यदा बाणः गृहं प्रति निवृत्तः तदा सः विद्वान् परिपक्वबुद्धिः अनुभवी चासीत्। अनेन रचिताः चत्वारः ग्रन्थाः सन्ति –

| | | | |
|---|---|---|---|
| 1. हर्षचरितम् (आख्यायिका) | 2. कादम्बरी (कथा) | 3. चण्डीशतकम् (पद्यकाव्यम्) | 4. पार्वतीपरिणयः (नाटकम्) |

बाणभट्टः संस्कृतगद्यकाव्यस्य सम्राट् अस्ति। उक्तं च–

नवोऽर्थो जातिरग्राम्या श्लेषोऽश्लिष्टः स्फुटो रसः।<br>
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम्।। (हर्षचरितम्)

हर्षवर्धनस्य मृत्योः अनन्तरं बाणः स्वग्रामं प्रीतिकूटं निवृत्तः। तत्रैव साहित्यरचनां कृतवान्।

## (ख) रचनापरिचयः

(i) 'हर्षचरितम्' ऐतिहासिकतथ्यप्रधानः आख्यायिकाग्रन्थः अस्ति। राज्ञः हर्षवर्धनस्य जीवनवृत्तमेव तत्र वर्णितम्।

(ii) 'कादम्बरी' – 'कादम्बरी' संस्कृतसाहित्यस्य सर्वोत्कृष्टा प्रेमगाथा अस्ति। इयं हि कविकल्पनामूलक-प्रेमकथा अस्ति। एषा तु चन्द्रापीडस्य पुण्डरीकस्य च जन्मत्रयस्य कथा वर्तते। अस्य कथानकस्य प्रारम्भः एवं भवति – प्राचीनकाले शूद्रकः विदिशायाः शासकः आसीत्। यदा स राजसभायाम् उपविष्टः आसीत् तदैव काचित् चाण्डालकन्या वैशम्पायननामकं शुकं राज्ञे समर्पितवती। शुकः मानुषीं वाणीं वक्तुमपि कुशलः आसीत्। तस्य

पूर्वजन्मनः स्मरणमपि आसीत्। चकितः राजा यदा शुकस्य वृत्तान्तम् ज्ञातुम् ऐच्छत् तदा सः शुकः जाबालिमुनिना ज्ञापितं स्वपूर्वजन्मनः वृत्तान्तं श्रावयति–

उज्जयिन्यां तारापीडः नृपः आसीत् तस्य राज्ञ्याः नाम विलासवती आसीत्। तयोः पुत्रस्य नाम चन्द्रापीडः आसीत्। तारापीडस्य महामन्त्री शुकनासः परमविद्वान् आसीत्। तस्य पुत्रस्य नाम वैशम्पायनः अभवत्। तयोः कुमारयोः परस्परं गाढमैत्री आसीत्। यदा राजकुमारः चन्द्रापीडः विद्याध्ययनं समाप्य प्रतिनिवृत्तः तदा तस्य युवराजस्य अभिषेककाले महामन्त्रिणा शुकनासेन तस्मै चन्द्रापीडाय यः उपदेशः प्रदत्तः स एव 'शुकनासोपदेशः' इति नाम्ना प्रसिद्धः जातः। अतः शुकनासोपदेशः कादम्बरीग्रन्थस्य एव एकं प्रमुखं स्थलम् अस्ति।

कादम्बरीरसभरेण समस्त एव
मत्तो न किञ्चिदपि चेतयते जनोऽयम्॥

# पदानुशीलनी

## प्रथमः पाठः

| | | |
|---|---|---|
| शम् | (अ.) | कल्याणम्, सुखम्; कल्याण, सुख, समृद्धिः; Happiness, Welfare, Prosperity. |
| नः | (स.) | [अस्मद् चतु.ब.व.], अस्मभ्यम् ; हमारे लिये; for us. |
| उरुचक्षा | (वि.) | अतिप्रकाशवान्; तेजोमय; radiant. |
| उदेतु | (क्रि.) | [उत् इ लोट् प्र. पु. ए. व.] उदयतु ; उदय होवे ; may rise. |
| चतस्रः | (वि.) | [चतुर् स्त्री. प्रथमा बहु. व.] चतस्रः दिशाः ; चारों दिशाएँ; all the four directions. |
| ध्रुवयः | (वि) | [वैदिकप्रयोगः] दृढाः, दृढतया स्थिताः ; मजबूत, स्थिर ; strong. |
| सिन्धवः | (सं) | [सिन्धु पु. प्र. ब. व.] सरितः, सागराः ; नदियाँ, सागर; rivers, oceans. |
| उ | (अव्य.) | अथ, च; और; and. |
| आपः | (सं) | [अपस् स्त्री. प्र. ब. व.] वहन्ति जलानि, बहते हुए पानी; flowing waters. |
| सन्तु | (क्रि.) | [अस् लोट् प्र. पु. ब. व.] भवन्तु; होवें; may be. |
| चक्षुषा | (सं) | [चक्षुष्, तृ., ए. व.] नेत्रेण; दृष्ट्या; आंख से; दृष्टि से; with friendly eye. |
| भूतानि | (सं) | [भूत, नपुं, प्र., ब. व.] प्राणिनः ; प्राणियों को, जीवों को ; living beings. |
| समीक्षन्ताम् | (क्रि.) | [सम् ईक्ष्, लोट्, प्र. पु. , ब. व.] पश्यन्तु ; देखें,; should look. |
| समीक्षे | (क्रि.) | [सम् ईक्ष्, लट्, उ. पु. , ए. व.,] पश्यामि, देखूं ; (I should) look at. |
| अमित्रात् | (सं) | [अमित्र, नपुं. , पं. , ए. व.] शत्रोः ; शत्रु से; from the enemy. |
| ज्ञातात् | (वि.) | [ज्ञा, क्त, पुं, पं, ए. व.] परिचितात्; जान पहचान वाले से; from the known. |
| नक्तम् | (अव्य.) | रात्रौ; रात में; at night. |
| दिवा | (अव्य.) | दिनसमये, दिन में; during day time. |
| आशाः | (सं) | [आशा, स्त्री. प्र. ब. व] दिशः ; दिशाएँ; all the directions. |
| ईशा | (सं) | [ईट् (शासने) तृ., ए. व.] सृष्टेः नियामकेन; संसार के नियन्ता के द्वारा; by the master of the universe. |

वास्यम् (वि.) [वस् आच्छादने, ण्यत्, नपुं, प्र., ए. व.] व्याप्तम्; व्याप्त; enveloped.

जगत्याम् (सं) [जगती, स्त्री., स., ए. व.] संसारे; संसार में; in this world.

भुञ्जीथाः (क्रि.) [भुज्, विधिलि., म पु., ए. व.] उपभोगं कुरु; उपभोग करो; consume, enjoy.

मा (सर्व.) [अस्मद्, द्वि., ए. व.] माम्; मुझ को; to me.

गृधः (क्रि.) [गृध्, लुङ्, म. पु., ए. व.] लोभं कुरु; लालच करो; be greedy.

## द्वितीयः पाठः

अरुक् (वि.) [नास्ति रुक् यस्य सः, ब. व्री.] नीरोगः, स्वस्थः; नीरोग, स्वस्थ; healthy, one who is not sick.

हितभुक् (वि.) [हितं भुङ्क्ते, उप. त. पु., प्र. वि. ए. व.] यः हितकरं पदार्थं भक्षयति; हितकर खाद्य वस्तु खाने वाला; one who eats nourishing food.

मितभुक् (वि.) [मितं भुङ्क्ते उप. त. पु., प्र. वि. ए. व.]यः मितं, मात्रानुसारं वा खादति;सीमित मात्रा में भोजन खाने वाला; one who eats food in limited quantity.

ऋतुभुक् (वि.) [ऋत्वनुसारं भुङ्क्ते, उप. त. पु. प्र. वि. ए. व.] यः ऋत्वनुकूलं पथ्यं भोजनं भक्षयति; ऋतु के अनुसार उपयुक्त भोजन सेवन करने वाला; one who eats food which is appropriate as per season.

प्रयुञ्जीत (क्रि.) [प्रयुज्, वि. लि., प्र. पु. ए. व.] प्रयोगं कुर्यात्, खादेत्; प्रयोग करे, सेवन करे; should take, should eat.

अनुवर्तते (क्रि.) [अनु/वृत्, लट् प्र. पु. ए. व.] अनुसरति, पालयति, अनुसरण करता है, पालन करता है; follows.

अजातानाम् (क्रि.) [न जातानाम्; नञ् त. पु. ष. ब. व.] न उत्पन्नानाम्, जो पैदा नहीं हुए, उनका, of those that are not born.

अनुत्पत्तिकरम् (वि.) [न उत्पत्तिकरम्, नञ् त. पु. प्र. वि., ए. व.] यत् विकारान् न उत्पादयति; जो विकारों को उत्पन्न न करे; that which may not cause (health hazards).

बहुफलम् (वि.) [बहूनि फलानि यस्मिन् तत् ब. व्री. नपुं. प्र. ए. व.] बहुभिः फलैः युक्तम्; बहुत फलों वाला; abounding in fruits.

बुभुक्षा (सं.) [भुज् सन् आ. स्त्री. प्र. ए. व.] भोक्तुम् इच्छा; खाने की इच्छा, भूख; appetite, desire to eat.

अतिमात्रम् (क्रि.वि.) [मात्रायाः अत्ययः, अ.] मात्रायाः आधिक्यम्; उचित मात्रा से अधिक;

| | | |
|---|---|---|
| | | in excessive quantity. |
| लघुता | (सं) | [लघु तल् स्त्री. प्र. ए. व.] शीघ्रपचनयोग्यता, सुपाच्यता; खाद्य पदार्थ का हल्कापन; lightness of food; digestibility. |
| उद्दिष्टम् | (वि.) | [उत् दिश् क्त नपु प्र. ए. व.] निर्दिष्टम्; बताया गया है; has been told/described. |
| गरिष्ठम् | (वि.) | [गुरु इष्ठन् नपुं प्र. ए. व.] यत् कठिनतया पच्यते तत् (भोजनम्); जो कठिनता से पचे, भारी; heavy, difficult to digest. |
| वर्णकान्तिजनकम् | (वि.) | [वर्णस्य कान्तेः जनकम् ष. त. पु. नपु. प्र. ए. व.] वर्णस्य सौन्दर्यस्य उत्पादकम्; रूप रंग निखारने वाला; that which enhances the beauty and complexion. |

## तृतीयः पाठः

| | | |
|---|---|---|
| संभोजनम् | (सं) | [सम् भुज् ल्युट् नपुं, प्र. ए. व.] सहभोजनम्; संगत में जीमना; प्रीतिभोज; eating together; a common meal or feast. |
| संकथनम् | (सं) | [सम् कथ् ल्युट्, नपुं, प्र. ए. व.] परस्परं प्रेम्णा कथोपकथनम्; किसी विषय पर बिना विरोध के चर्चा ; amicable conversation. |
| ज्ञातिभिः | (सं) | [ज्ञा क्तिन् स्त्री., तृ. ब. व.] परिजनैः सम्बन्धिभिः; रिश्तेदारों से; with relatives. |
| तुष्टः | (वि.) | [तुष् क्त, पुं, प्र., ए. व.] प्रसन्नः सन्तोषयुक्तः; happy; satisfied. |
| रुष्टः | (वि.) | [रुष् क्त पुं, प्र. ए. व.] क्षुब्धः; नाराज़; angry; annoyed. |
| अव्यवस्थितचित्तानाम् | (वि.) | [न व्यवस्थितं चित्तं येषां (ब. व्री) ; वि अव स्था क्त पुं, ष., ब., व.] अस्थिरमनसाम्; जिन का मन स्थिर नहीं है उनका; of the persons with unsteady mind. |
| प्रसादः | (सं) | [प्र सद् घञ् पुं, प्र., ए., व.] अनुग्रहः; प्रसन्नता; कृपा; favour. |
| तोयम् | (सं) | [नपुं, प्र. ए. व.] जलम्; पानी ; water. |
| पक्ष्मणी | (सं) | [पक्ष्मन्, नपुं, प्र. द्वि. व.] नेत्रयोः पक्ष्मणी; आंखो की पलकें; eye lashes. |
| कृतधियः | (वि.) | [कृता (परिनिष्ठिता) धीः येषां ते, (ब. व्रीः)] बुद्धिमान्; दृढनिश्चयवाले; wise, of firm resolve. |
| निराकुलाः | (क्रि.) | [न आकुलाः ; पुं प्र. ब. व.] अनुद्विग्नाः, अखिन्नाः; शान्तचित्त, व्याकुल न होने वाले unagitated. |
| उपाश्रयति | (क्रि.) | [उप, आ श्रि, लट् प्र. पु. ए. व.] उपगच्छति, ज्ञानाय विदुषां सम्पर्कं करोति; ज्ञान के लिए विद्वानों के पास जाता है; goes to wise people for learning. |
| दिवाकरः | (सं) | [दिवा, कृ, अच् पुं प्र. ए. व.] सूर्यः, सूर्य,; sun. |

## चतुर्थः पाठः

| | | |
|---|---|---|
| यशोधनानाम् | (वि॰) | [यशः एव धनं येषां तेषाम्, (ब. व्री) पुं, ष. ब. व.] कीर्तिविभवानाम्; जो यश को सबसे बड़ा धन मानते हैं; Those who consider fame as the greatest wealth. |
| गरीयः | (वि॰) | [गुरु, ईयस्, नपुं, प्र., ए. व.] सर्वोत्कृष्टम्; सब से उत्तम; sublime. |
| अनुगच्छन् | (वि॰) | [अनु, गम्, शतृ, पुं. प्र. ए. व.] अनुसरन्; पीछे जाता हुआ; following. |
| कलकलनिनादिनी | (वि॰) | [कलकल नि, नद्, घञ्, इन्, स्त्री, प्र., ए. व.] कलकलं (मधुरं) शब्दं कुर्वती; कलकल का मधुर शब्द करती हुई; making sweet sound of Kalkal. |
| पुरतः | (अव्य॰) | अग्रे, समक्षम्; आगे, सामने; in front of. |
| हिमाच्छन्नः | (वि॰) | [हिमेन आच्छन्नः, (तृ. त.) आ छद् क्त, पुं, प्र. ए. व.] हिमेन आच्छादितः; बर्फ से ढका हुआ; covered with snow. |
| गिरिराजः | (वि॰) | [गिरीणां राजा, (ष. त.) प्र., ए. व.] पर्वतानां राजा (हिमालयः); हिमालय पर्वत ; King of mountains. |
| समृद्धाः | (वि॰) | [सम्, ऋध्, क्त, प्र., ब. व.] परिपूर्णाः; भरे हुए; abounding in, Enriched. |
| सिंहगर्जना | (सं) | [सिंहस्य गर्जना, (ष.त.) स्त्री., प्र. ए. व.] सिंहस्य गर्जनम्; शेर की दहाड़; roar of the lion. |
| आक्रान्ता | (वि॰) | [आ, क्रम्, क्त, टाप्, प्र., ए. व.] आक्रमणं कृता, प्रहृता; जिस पर आक्रमण किया गया है; one who has been attacked. |
| उद्यम्य | (अव्य.) | [उत्, यम्, ल्यप्] उत्थाप्य; उठाकर; having lifted up. |
| दुरात्मन् | (वि.) | [दुष्टः आत्मा यस्य सः (ब. व्री.) सम्बो., ए. व.] दुष्टः; दुष्ट; vile, wicked. |
| परित्राणम् | (सं) | [परि, त्रा, ल्युट्, प्र., ए. व.] रक्षणम्; रक्षा ; protection. |
| कुलव्रतम् | (सं) | [कुलस्य व्रतम्, ष.त. प्र., ए. व.] कुलस्य प्रतिज्ञा; कुल की प्रतिज्ञा; vow of the dynesty. |
| निषङ्गात् | (सं) | [निषङ्ग पुं, पञ्चमी, ए.व.] तूणीरात्; तरकस से; from the quiver. |
| निष्कासयितुम् | (अव्य॰) | [निस्, कस्, णिच्, तुमुन्] उद्धर्तुम्; निकालने के लिए; to take out. |
| सक्तः | (वि॰) | [सञ्ज्, क्त, पुं, प्र. ए. व.] लग्नः; चिपका हुआ; Stuck. |
| मोचयितुम् | (अव्य॰) | [मुच्, णिच्, तुमुन्] मुक्तं कारयितुम्; छुड़ाने के लिए; to get rid of. |
| प्रतिरुद्धा | (वि॰) | [प्रति, रुध्, क्त, टाप्, प्र. ए. व.] प्रतिहता; रोक दी गई; has been obstructed, has been held up. |
| उन्मूलयितुम् | (अव्य॰) | [उत्, मूल, ना. धा. तुमुन्] मूलात् उत्पाटयितुम्; जड़ से उखाड़ने के लिए; to uproot. |

| | | |
|---|---|---|
| आततायी | (वि.) | [आततायिन् पु. प्र. वि. ए. व.] अत्याचारी, अत्याचार करने वाला; one who torchers, cruel. |
| पारणायै | (सं) | [पारणा, स्त्री. चतु. ए. व.] व्रतान्ते क्रियमाणाय भोजनाय; व्रत तोड़ने के लिये किये जाने वाले भोजन के लिये; food for breaking the fast. |
| अनिष्टम् | (वि.) | [न इष्टम्, नञ् त. पु. इष्, क्त, नपुं, द्वि. ए. व.] अहितम्, हानिम्; नुकसान को, क्षति को ; harm. |
| रुद्रौजसा | (सं) | [रुद्रस्य ओजसा ष.त.पु; ओजस्, पुं, तृ. ए. व.] महादेवस्य तेजसा; महादेव की शक्ति से; with the power of Lord Shiva. |
| तोषयितुम् अर्हति | (छ०) | [तुष्, णिच्, तुमुन्] सन्तुष्टं कर्तुम् समर्थः ; प्रसन्न करने के लिये समर्थ हो;, (can) satisfy. |
| (क्षुधां) शमय | (क्रि.) | [शम्, णिच्, लोट् म. पु. ए. व.] क्षुधां शान्तां कुरु, भूख मिटाओ; satisfy (your) hunger. |
| एकातपत्रम् | (वि.) | [एकम् आतपत्रं यस्मिन् तत्; ब. व्री. नपुं. प्र. ए. व.] एकच्छत्रम्; एकछत्र, चक्रवर्त्ती (साम्राज्य) ; sovereignty. |
| प्रभुत्वम् | (सं.) | [प्रभु, त्व, नपुं, प्र. ए. व.] स्वामित्वम्; अधिकार; authority. |
| वयः | (सं) | [वयस्, नपुं. प्र. ए. व.] आयुः, उम्र, ; age. |
| हातुम् | (अ.) | [हा, तुमुन्] त्यक्तुम्; छोड़ने के लिये, for giving up. |
| विचारमूढः | (वि.) | [विचारे मूढः, सप्त. तत्पु. ए. व.] विवेकहीनः ; मूर्ख; stupid. |
| परिहाय | (अ.) | [परि, हा, ल्यप्] त्यक्त्वा, ; छोड़कर, ; leaving it aside. |
| अहिंस्यः | (वि.) | [न हिंस्यः, नञ् तत्पुः, हिंस् यत् पु. ए. व.] न मारणीयः, न मारने योग्य; one, not to be killed. |
| यशः शरीरे | (सं.) | [यशः एव शरीरं, तस्मिन्, नपुं, स. ए. व.] यशःकाये, यशसि; यश रूपी शरीर पर; on my embodied fame. |
| एकान्तविध्वंसिषु | (वि.) | [एकान्तं विध्वंस्, इन्, नपुं, स. ब. व.] निश्चितविनाशवत्सु; निश्चित रूप से नष्ट होने वाले; bound to be destroyed. |
| पिण्डेषु | (सं) | [पिण्ड, स. ब. व.] शरीरेषु, देहेषु, ; शरीरों में, ; on the bodies. |
| भौतिकेषु | (वि.) | [भूत, ठक्, नपुं, स. ब. व.] भौतिकशरीरेषु, पञ्चभूतैः निर्मितैः शरीरेषु, ; पंच महाभूत से निर्मित शरीरों में, ; on the physical bodies made of five elements. |
| अनास्था | (सं) | [न आस्था, नञ् तत्पु. स्त्री. प्र. ए. व.] अश्रद्धा, अरुचिः ; अविश्वास, ; faithlessness. |
| आत्मकृत्यम् | (सं) | [आत्मनः कृत्यम् ष. तत्पु. द्वि. ए. व.] आत्मनः कार्यम्, अपना कार्य, ; own duty. |

| | | |
|---|---|---|
| सम्पादय | (क्रि.) | [सम्, पद्, णिच्, लोट्, म. पु. ए. व.] सम्पन्नं कुरु; पूरा करो; fulfill (your duty). |
| मायासिंहः | (सं) | [मायया प्रकटीकृतः सिंहः पु. प्र. ए. व.] मायारूपीसिंहः; मायावी सिंह, ; appearing as lion. |
| परीक्षितुम् | (अ.) | [परि, ईक्ष्, तुमुन्] परीक्षां कर्तुम्; परखने के लिये; for testing. |
| पटाक्षेपः | (सं) | [पटस्य आक्षेपः, ष. तत्पु. प्र. ए. व.] यवनिकायाः पतनम्; परदे का गिरना; fall of the curtain. |

## पञ्चमः पाठः

| | | |
|---|---|---|
| विकसितम् | (वि.) | [वि, कस्, क्त, नपुं, द्वि. ए. व.] प्रफुल्लम्; खिला हुआ; Blooming. |
| उद्यतम् | (वि.) | [उत्, यम्, क्त, नपुं, द्वि. ए. व.] उन्नतम्; ऊँचा; high. |
| प्रबुद्धम् | (वि.) | [प्र, बुध्, क्त, नपुं, द्वि. ए. व.] जागरितम्; जागरूक; awakened. |
| आन्तरम् | (वि.) | [नपुं, द्वि, ए. व.] हृदयम्; अन्तर्वर्तिनम्; हृदय को; to heart. |
| निखिलसङ्गे | (सं) | [निखिलानां सङ्गे, (ष. त.) पुं, ए. व.] सर्वेषां सङ्गे; सबके साथ; in every one's company. |
| छन्दः | (सं) | [छन्दस्, नपुं, प्र. ए. व.] गीत; music. |
| निष्पन्दितम् | (वि.) | [नि, स्पन्द्, क्त, नपुं, द्वि, ए. व.] गतिहीनम्; स्थिर; stable, motionless. |
| नन्दितम् | (वि.) | [नन्द्, क्त, नपुं, द्वि, ए. व.] हृष्टम्; प्रसन्न; delighted. |

## षष्ठः पाठः

| | | |
|---|---|---|
| अयापयत् | (क्रि.) | [या, णिच्, लङ्, प्र. पु. ए. व.] यापितवान्, व्यतीतम् अकरोत्; बिताया; led. |
| आविरभूत् | (क्रि.) | [आविः, भू, लुङ्, प्र. पु. ए. व.] प्रकटितः अभवत्; प्रकट हुए; appeared. |
| पालयतः | (वि.) | [पाल्, शतृ, ष. ए. व.] पालनं कुर्वतः, पालन करते हुए (उसके), of the one observing. |
| तपः | (सं) | [तपस् द्वि. ए. व.] तपस्याम्; तपस्या को; penance. |
| कैवल्यज्ञानम् | (सं) | [कैवल्यस्य ज्ञानम् ष. त. पु. द्वि. ए. व.] मोक्षस्य ज्ञानम्; मोक्ष के ज्ञान को; salvation. |

| | | |
|---|---|---|
| अरिहन्ता | (सं) | [अरीणां हन्ता ष. तत्पु., पुं. प्र. ए. व.] विषयवासनादिशत्रूणां हन्ता जीवन्मुक्तः; सांसारिक विषयवासनाओं से दूर; free from the attachment of worldly object. |
| अपातयत् | (क्रि.) | [पत्, णिच्, लङ्, प्र. पु. ए. व.] पातितवती, क्षिप्तवती; डाल दिया; threw. |
| वयसि | (सं.) | [वयस् स. ए. व.] आयुषि; उम्र में, ; in the (young) age. |
| आर्यिका | (वि.) | [आर्यक, टाप्, स्त्री. प्र. ए. व.] आदरणीया गणनेत्री, ; आदरणीय गणनेत्री, ; honourable leader of a group.<br>आर्य – कर्तव्यमाचरन् कार्यमकर्तव्यमनाचरन्,<br>तिष्ठति प्रकृताचारे स वा आर्य इति स्मृतः ॥ (आप्टे) कर्तव्य का आचरण करने वाला, अकरणीय कार्यों को न करने वाला जो व्यक्ति सदाचार में स्थित रहता है उसे आर्य कहते हैं ;<br>one who does the right deeds, shuns the deeds not worthy of being performed, has fixed way of good conduct, is called an Arya. |
| षट्त्रिंशत्सहस्राणाम् | (वि.) | षट् च त्रिंशत् च, सहस्रंच, तेषाम्] 36,000 आर्यिकाओं की; of a group of thirty six thousand noble ladies known as Aryikas. |
| सम्यक् दर्शनम् | (सं.) | सम्यक् दृष्टिः, हिताहितविवेकः; भले बुरे, सत्य असत्य की पहचान, ; capability to distinguish between good and bad, truth and falsehood. |
| गर्हणीयः | (क्रि.) | [गर्ह्, अनीयर्, पु. प्र. ए. व.] निन्दनीयः ; निन्दा के योग्य; fit to be blamed. |
| दुःखदाः | (वि.) | [दुःखं ददाति इति उप. तत्पु. पु. प्र. ब. व.] दुःखदायकाः, दुःखदायी, ; painful. |
| अद्यतावत् | (अ.) | अद्यपर्यन्तम्; आज तक; till date. |
| दावानलः | (सं.) | वनस्य अग्निः; जंगल की आग; fire of the forests, conflagration. |
| दाहः | (सं.) | ज्वलनम्; जलन, गर्मी, तपिश, ; heat. |
| नीरम् | (सं.) | जलम्; पानी; water. |
| सम्मोहः | (सं.) | [सम्, मुह्, घञ्, पुं.] अज्ञानम्, मतिविभ्रमः ; सम्मोह, माया–मोह से उत्पन्न मूर्च्छा; delusion caused by attachment to objects of senses. |
| रसा | (सं.) | पृथ्वी; भूमि ; earth. |
| दारणम् | (सं.) | विदारणम्, फाड़ना ; to tear up. |
| सारसीरम् | (सं.) | दृढं हलम् ; मजबूत हल ; strong plough. |
| गिरिसारधीरम् | (वि.) | [गिरेः सारवत् धीरम्] यस्य धैर्यम् पर्वतस्य दृढतानुरूपम् अस्ति; पर्वत के समान अचल धैर्यवान्; firm in patience as a strong mountain. |

## सप्तमः पाठः

| | | |
|---|---|---|
| किल | (अ.) | निश्चयेन; निश्चयपूर्वक; indeed, certainly. |
| गीतकानि | (सं.) | [गीत, कन्, नपुं. प्र. ब. व.] गीतानि, स्तोत्राणि, स्तुतिपरकानि गीतानि; गीत, स्तुति; hymns of praise. |
| स्वर्गापवर्गास्पदमार्गभूते | (वि.) | [स्वर्गस्य अपवर्गस्य च आस्पदम् तस्य च मार्गभूतम् साधनरूपम् तस्मिन्; स्वर्गमोक्षप्राप्तिसाधनरूपे; स्वर्ग और मोक्ष की प्राप्ति में साधन रूप; (भारत में), (on the land of Bharat) which is a path leading to heaven and salvation. |
| भूयः | (अ.) | पुनः, फिर, दुबारा; again. |
| विशदीकरोति | (क्रि.) | [विशद, च्वि, कृ, लट् प्र. पु. ए. व.] स्पष्टं करोति; प्रकाशितं करोति; प्रकाशित करती है; clarifies, brightens, enlightens. |
| प्रखरीकरोति | (क्रि.) | [प्रखर, च्वि, कृ, लट्, प्र. पु. ए. व.] प्रखरां करोति, तीव्रां करोति; तेज करती है, पैनी करती है; sharpens. |
| आदधाति | (क्रि.) | [आ, धा, लट्, प्र. पु. ए. व.] स्थापयति; स्थापित करती है; provides. |
| आरोग्यम् | (सं.) | स्वास्थ्यम्; स्वास्थ्य; health. |
| सूपचारैः | (सं.) | [सुष्ठु उपचारैः, पुं. तृ. ब. व.] उत्तमचिकित्साप्रयोगैः, अच्छे इलाज से; with the help of good treatment. |
| सुसाध्यम् | (वि.) | [सुष्ठु साध्यम्] सुसाध्यम्; सम्यक् साधयितुम् शक्यम्; ठीक करने योग्य; curable. |
| पद्माकरम् | (सं.) | [पद्मानाम् आकरः तम् ष. तत्पु. द्वि. ए. व.] कमलानां समूहम्, कमलों के समूह को; a cluster of lotuses. |
| कैरवचक्रवालम् | (सं.) | [कैरवाणां चक्रवालः तम्, ष. तत्पु. द्वि. ए. व.] कुमुदानां समूहम्; सफेद कमलों के समूह को; a cluster of white lilies. |
| नाभ्यर्थितः | (वि.) | [न अभि अर्थ् क्त, पुं. प्र. ए. व.] अयाचितः; न मांगने पर भी; without being asked for. |
| कृताभियोगाः | (वि.) | कृतः अभियोगः यैः ते – अभि, युज्, घञ्, पुं. प्र. ब. व.] प्रयत्ने रताः; प्रयत्न में लगे हुए, उद्यमशील; engaged in making efforts. |
| क्वणन्तः | (वि.) | [क्वण्, शतृ, पुं. प्र. ब. व.] रणन्तः, झनझनाते हुए; रुनझुन की ध्वनि करते हुए; producing tinkling sound. |
| मलदायकाः | (वि.) | [मलस्य दायकाः, ष. तत्पु. पु. प्र. ब. व.] दोषारोपणकर्तारः; दोषारोपण करने वाले; always blaming others. |

| | | |
|---|---|---|
| साधुध्वनिभिः | (सं.) | [साधुभिः ध्वनिभिः, कर्म. तृ. ब. व.] मधुरशब्दैः; मीठी वाणी से; through sweet words. |
| मणिनूपुराः | (सं.) | [मणिभिः जटिताः नूपुराः, मध्यमपदलोपी तत्पु; प्र. ब. व.] मणिजटितनूपुराः; मणिजटित बिछुए ; पायजेब; jewel studded anklets. |
| अप्रतिष्ठः | (वि.) | [न प्रतिष्ठा यस्य सः, ब. व्री. प्र. ए. व.] प्रतिष्ठारहितः, यः सुनिश्चितः नास्ति; जो सुनिश्चित नहीं है; one who is not well established. |
| श्रुतयः | (सं.) | [श्रु, क्तिन्, स्त्री. प्र. ब. व.] शास्त्राणि; वेदसम्बद्धशास्त्र; scriptures related to Vedas. |
| प्रमाणम् | (सं) | [प्र, मा, ल्युट्, नपुं. प्र. ए. व.] सिद्धम्; सबूत; a thing of proven entity; finally established. |
| निहितम् | (वि.) | [नि, धा, क्त, नपुं., प्र., ए., व.,] गूढम्, अपिहितम्; छुपा हुआ; hidden. |

## अष्टमः पाठः

| | | |
|---|---|---|
| गुरूपदेशः | (सं) | [गुरोः उपदेशः ष. तत्पु., पुं. प्र. ए. व.] आचार्यस्य उपदेशः; गुरु का उपदेश; the advice of a preceptor. |
| अखिलमलप्रक्षालनक्षमम् | (वि.) | [अखिलानां मलानां प्रक्षालने क्षमम्, तत्पु. नपुं. प्र. ए. व.] सकलदोष-उन्मूलनसमर्थम्; सभी दोषों को शान्त करने में समर्थ ; capable of washing away all the malices. |
| अजलम् | (वि.) | [न जलम् यस्मिन् (तत् स्नानम्) ब. व्री. नपुं., प्र. ए. व.] जलरहितम् (स्नानम्); बिना जल के (स्नान) ; (bath) without water. |
| भवादृशाः | (सर्व.) | [भवादृश, पुं., प्र., ब., व.] त्वादृशाः; आप जैसे; people like you. |
| भाजनानि | (सं) | [भाजन, नपुं, प्र. ब. व.] पात्राणि; पात्र; worthy of being instructed. |
| उपदेष्टारः | (वि.) | [उप + दिश्, तृच्, पुं, प्र. ब. व.] उपदेशस्य दातारः, उपदेश देने वाले; advisors, preachers. |
| अहङ्कारमूला | (वि.) | [अहङ्कारः एव मूलं यस्याः सा, ब. व्री. स्त्री., प्र. ए. व.] अभिमानमूला; अहङ्कार से युक्त; full of arrogance. |

| | | |
|---|---|---|
| राजप्रकृतिः | (सं) | [राज्ञाम् प्रकृतिः, ष. त., स्त्री., प्र. ए. व.] राज्ञां स्वभावः; राजाओं का स्वभाव ; nature of the kings. |
| प्रतिशब्दकः | (सं) | [प्रति शब्द क (स्वार्थे), प्रतिशब्दं करोति इति, पुं, प्र. ए. व.] प्रतिध्वनिः; गूंज की आवाज़; echo. |
| अभिनवयौवनत्वम् | (सं) | [अभिनवं यौवनम् यस्य सः, ब., व्री., तस्य भावः तस्य तत्त्वम्, अभिनवयौवनत्वं; नपुं., प्र. ए. व.] नवयौवनम्, नई जवानी; fresh youth. |
| अप्रतिमरूपत्वम् | (सं) | [अप्रतिमम् रूपम् यस्य तत्ः, ब, व्री; तस्य भावः तत्त्वम्, अप्रतिमरूपत्वम् नपुं, प्र., ए. व.] अतुलितसौन्दर्यम्; अनुपम सौन्दर्य; unparalleled beauty. |
| आलोकयतु | (क्रि.) | [आ, लोकृ, लोट्, प्र., पु., ए., व.] पश्यतु; देखें; examine, observe. |
| कल्याणाभिलाषी | (वि.) | [कल्याणे अभिलाषा अस्य अस्ति इति, समासगर्भित तद्धित; इन् कल्याणाभिलाषिन्, पुं. प्र., ए., व.] मंगलाकांक्षी, कल्याण की कामना करने वाला, ; desirous of well-being. |
| अभिजनम् | (सं) | [अभि, जन, पुं, द्वि., ए., व.] कुलीनताम्; ऊंचे वंश में जन्म ; birth in a noble family. |
| कुलक्रमम् | (सं) | [कुलस्य क्रमम् ष. तत्पु., पुं, द्वि., ए., व.] वंशपरम्पराम्, कुल की परम्परा को; to heredity. |
| अनुवर्तते | (क्रि.) | [अनुवृत् (आ.) लट्, प्र., पु., ए., व.] अनुसरति; अनुगमन करती है; follows. |
| अनुबुध्यते | (क्रि.) | [अनुबुध्, (आ.) लट्, प्र., पु., ए., व.] अगमम्यते; समझती है; follows understands. |
| वैदग्ध्यम् | (सं) | [विदग्ध, ष्यञ्, नपुं, प्र., ए. व.] पाण्डित्यम्; विद्वता को ; scholastic achievements. |
| उपसर्पति | (क्रि.) | [उप सृप् लट् प्र. पु., ए. व.] समीपं गच्छति; पास जाती है; approaches. |
| तरङ्गबुद्बुद्वत् | (अव्य.) | [तरङ्गाः च बुद्बुदाः च ताभ्यां तुल्यम्] उर्मिभिः बुद्बुदैः तुल्यम् गतिशीला अस्थिरा च; लहरों और बुलबुलों के समान चंचल; unsteady like the bubbles and waves. |
| दीपशिखेव | (सं) | [दीपस्य शिखा इव ष. तत्पु., स्त्री., प्र., ए. व.] दीपकस्य ज्योतिः इव; दीपक की ज्योति (लौ) की तरह; like the flame of the lamp. |

| | | |
|---|---|---|
| कज्जलमलिनम् | (वि.) | [कज्जलम् इव मलिनम् कर्मधा., नपुं, द्वि., ए. व.] कज्जलवत् मलिनम्; काजल के समान काले, दूषित; black like collyrium. |
| उद्वमति | (क्रि.) | [उत् वम् लट्, प्र. पु. ए. व.] उद्गिरति; उगलती है ; vomits. |
| महामोहकारिणी | (वि.) | [महान् चासौ मोह: (कर्मधा.) तं कर्तुं शीलं यस्या: सा. महामोह कारिणी] अज्ञानान्धकारिणी विवेकशून्य और अन्धा बनाने वाली (जवानी); unfatuating. |
| प्रयतेथा: | (क्रि.) | [प्र यत् आ. वि लिङ् म. पु. ए. व.] प्रयत्नं कुरु; प्रयत्न करो; try. |
| उपालभ्यसे | (क्रि.) | [उप आ लभ् कर्मवा., लट्; म. पु. ए. व.] तुभ्यम् उपालभ्भ: दीयते; तुम्हें उलाहना दिया जाता है; you are blamed. |
| कामम् | (सं) | सत्यम्; सच है; true. |
| प्रकृत्यैव | (सं) | [प्रकृत्या + एव, प्रकृति, स्त्री. तृ. ए. व.] स्वभावेन; स्वभाव से ही; by nature. |
| समारोपितसंस्कार: | (वि.) | [समारोपिता: संस्कारा: यस्मिन् स:; (ब. व्री); पुं. प्र. ए. व.] संस्थापितसंस्कार:; उत्तम संस्कारों से परिष्कृत; adorned with good manners. |
| मुखरीकृतवान् | (क्रि.) | [मुखर च्वि कृ क्तवतु, पुं प्र. ए. व.]प्रेरितवान्; तुम्हारे गुणों ने ही प्रेरित किया है; |
| नवयौवराज्याभिषेकमङ्गलम् | (सं) | [युवा चासौ राजा युवराज: (कर्मधा); तस्य भाव: यौवराज्यम्; नवं च तद् यौवराज्यम्; (कर्मधा.) तस्य तस्मिन् वा(त.) तद्रूपमङ्गलम्(कर्मधा.)] नूतनयुवराजपदे अभिषेकस्य कल्याणम्; नूतन युवराज पद पर अभिषेक के मङ्गल को; pleasures of auspicious coronation as a new prince. |

# ऋतिका

(संस्कृतस्य केन्द्रिकपाठ्यक्रमे एकादशकक्षायै पाठ्यपुस्तकम्)

**( प्रथमः भागः )**

**केन्द्रीय माध्यमिक शिक्षा बोर्ड. दिल्ली**

पहला संस्करण

जनवरी 2005

**प्रतियां :** 6000

© CBSE

**मूल्य :** रु. 55.00

**प्रकाशक :** सचिव, केन्द्रीय माध्यमिक शिक्षा बोर्ड,
2, सामुदायिक केन्द्र, शिक्षा केन्द्र, दिल्ली-110092

**अक्षर संयोजक :** राईट इम्प्रैशनस, दिल्ली-110006

**मुद्रक :**

# पुरोवाक्

केन्द्रीयमाध्यमिकशिक्षासङ्घटनेन वरिष्ठमाध्यमिककक्षासु अध्यापनार्थं द्विविधः भाषापाठ्यक्रमः निर्धारितः केन्द्रिकपाठ्यक्रमः ऐच्छिकपाठ्यक्रमश्च । उभयोरेव पाठ्यक्रमयोः उद्देश्यानि भिन्नानि सन्ति । केन्द्रिक-पाठ्यक्रमे भाषायाः भाषिकतत्त्वानाम् अभ्यासः चतुर्षु च कौशलेषु नैपुण्यम् अधिकं महत्त्वपूर्णं भवति । ऐच्छिकपाठ्यक्रमे साहित्यशिक्षणं प्रधानं भवति । केन्द्रिकपाठ्यक्रमस्य उद्देश्यं संलक्ष्य 'ऋतिका' इति पाठ्यपुस्तकस्य 'प्रथमो भागः' एकादशकक्षायै निर्मितः । अस्य पुस्तकस्य वैशिष्ट्यम् अधोलिखितमस्ति-

- पाठानाम् अवबोधनार्थं पुस्तके एव श्लोकानाम् अन्वयाः भावार्थाः च स्पष्टीकृताः ।
- रवीन्द्रनाथठाकुरमहाभागानां गीताञ्जलिकाव्यपुस्तकात् एकं गीतं समुद्धृतम् ।
- चरित्रनिर्माणार्थम् उपयोगिमूल्यानि अधिकृत्य जीवनवृत्तम्, उपदेशाः, नाट्यांशाः च सङ्कलिताः उद्धृताः वा ।
- अस्माकं देशस्य संविधानस्य आधारभूतानि 'स्वतन्त्रता, समानता, भ्रातृत्वं, न्यायः' इति चत्वारि मूल्यानि अधिकृत्य सुभाषिताः अत्र समाहिताः ।
- भाषिकतत्त्वानाम् अभ्यासाय अत्र प्रचुराः अभ्यासाः प्रदत्ताः ।
- पाठविकासान्तर्गते प्रतिपाठम् अधिकृत्य काव्यपरिचयः, लेखकपरिचयः, विशिष्टाः टिप्पण्यः समानान्तरसूक्तिप्रयोगाः च प्रदत्ताः ।

एतस्य पुस्तकस्य निर्माणे यैः विद्वज्जनैः येन केन प्रकारेण साहाय्यं कृतं तेभ्यः सर्वेभ्यः सङ्घटनपक्षतः हार्दिकीं कृतज्ञतां ज्ञापयामः ।

संस्कृतभाषाशिक्षणे परियोजनारूपेण महत्त्वपूर्णं योगदानं कुर्वतां शैक्षिकनिदेशकानां जी. बालासुब्रह्मण्यन् महोदयानां कृते, उपशिक्षाधिकारीपदम् अलङ्कुर्वाणानां डा. साधनापाराशरमहोदयानां कृते अपि धन्यवाद-ज्ञापनं क्रियते ।

शिक्षायाः क्षेत्रे न कोऽपि अन्तिमः शब्दः भवति । सर्वत्र संशोधनस्य संस्करणस्य अपेक्षा तु वर्तते एव । अतः परिमार्जनाय प्रस्तावाः स्वागतार्हाः ।

**अशोक गांगुली**
अध्यक्षः
केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड
दिल्ली

# कृतज्ञताज्ञापनम्

**केन्द्रीय माध्यमिक शिक्षा-बोर्ड-परामर्श-समितिः**

श्री अशोक गाङ्गुली, अध्यक्षः, के. मा. शि. बोर्ड, नई दिल्ली

श्री जी. बालासुब्रह्मण्यन्, निदेशकः (शैक्षिक) के. मा. शि. बोर्ड, नई दिल्ली

**संस्कृतपरामर्शसमितिः- सदस्याः**

प्रो. वाचस्पतिः उपाध्यायः

प्रो. वी. कुटुम्बशास्त्री

डा. नोदनाथः मिश्रः

श्री चमूकृष्णः शास्त्री

श्री चांदकिरणः सलूजा

**पाठ्यसामग्रीनिर्माणसमितिः**

- श्री चांदकिरण सलूजा, प्राध्यापकः, शिक्षाविभागः दिल्ली वि.वि. (संयोजकः)
- श्रीमती शशिप्रभागोयल, पूर्वप्रवाचिका, रा. शै. अनु. एवं प्रशिक्षणपरिषद्, दिल्ली
- श्रीमती सन्तोष कोहली, सेवानिवृत्ता उपप्रधानाचार्या, सर्वोदय-सह-शिक्षा-विद्यालयः, दिल्ली
- श्री ओम् प्रकाश ठाकुर, पूर्वः उपप्रधानाचार्यः, सर्वोदय-सह-शिक्षा-विद्यालयः, दिल्ली
- डा. भास्करानन्द पाण्डेयः उपप्रधानाचार्यः, राजकीय-वरिष्ठ-माध्यमिक-बालविद्यालयः, मुण्डका, दिल्ली
- श्रीमती मीना बंसल, उपप्रधानाचार्या, रामजस-गर्ल्ज-व.-मा.-विद्यालयः, दरियागंजः, नई दिल्ली
- श्रीमती अनीता शर्मा, संस्कृतविभागाध्यक्षा, विवेकानन्द-विद्यालयः, आनन्द-विहारः, दिल्ली
- श्रीमती आदर्श आहूजा, संस्कृत-अध्यापिका, दिल्ली-पब्लिक-विद्यालयः, मथुरा-रोडः, नई दिल्ली

**प्रायोजना - अधिकारी**

डा. साधना पाराशर, उप-शिक्षा-अधिकारी, केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, नई दिल्ली

# विषयानुक्रमणिका


| क्रमांङ्कः | पाठाः | पृष्ठसंख्या |
|---|---|---|
| 1. | मम मित्रं भवन्तु | 1 |
| 2. | सर्वे भवन्तु सुखिनः | 11 |
| 3. | शीलम् एतत् प्रशस्यते | 22 |
| 4. | यशोधनानां हि यशो गरीयः | 31 |
| 5. | मानसं मम विकसितं कुरु | 39 |
| 6. | क्षमावीरो विजयते | 48 |
| 7. | महाजनो येन गतः स पन्थाः | 54 |
| 8. | गुरूपदेशः अजलं स्नानम् | 62 |
| | *पाठानुसारं शब्दार्थाः* | 70 |

# भारत का संविधान

## उद्देशिका

हम, भारत के लोग, भारत को एक [1] [सम्पूर्ण प्रभूत्व-संपन्न समाजवादी पंथनिरपेक्ष लोकतंत्रात्मक गणराज्य] बनाने के लिए, तथा उसके समस्त नागरिकों को:

सामाजिक, आर्थिक और राजनैतिक न्याय,
विचार, अभिव्यक्ति, विश्वास, धर्म
और उपासना की स्वतंत्रता,
प्रतिष्ठा और अवसर की समता
प्राप्त कराने के लिए,
तथा उन सब में,
व्यक्ति की गरिमा और [2] [राष्ट्र की एकता
और अखण्डता] सुनिश्चित करने वाली बंधुता
बढ़ाने के लिए

दृढ़संकल्प होकर अपनी इस संविधान सभा में आज तारीख 26 नवम्बरए 1994 ई॰ को एतद्द्वारा इस संविधान को अंगीकृत, अधि नियमित और आत्मार्पित करते हैं।

1. संविधान (बयालीसवां संशोधन) अधिनियम, 1976 की धारा 2 द्वारा (3.1.1977) से ''प्रभुत्व-संपन्न लोकतंत्रात्मक गणराज्य'' के स्थान पर प्रतिस्थापित।
2. संविधान (बयालीसवां संशोधन) अधिनियमए 1976 की धारा 2 द्वारा (3.1.1977 से) ''राष्ट्र की एकता'' के स्थान पर प्रतिस्थापित।

### भाग 4 क

## मूल कर्त्तव्य

51 क. मूल कर्त्तव्य - भारत के प्रत्येक नागरिक का यह कर्त्तव्य होगा कि वह-

(क) संविधान का पालन करें और उसके आदर्शों, संस्थाओं, राष्ट्र गान का आदर करें:

(ख) स्वतंत्रता के लिए हमारे राष्ट्रीय आंदोलन को प्रेरित करने वाले उच्च आदर्शों को हृदय में संजोए रखें और उनका पालन करें;

(ग) भारत की प्रभुता, एकता और अखंडता की रक्षा करें और उसे अक्षुण्ण रखें;

(घ) देश की रक्षा करें और आह्वान किए जाने पर राष्ट्र की सेवा करें;

(ङ) भारत के सभी लोगों में समरसता और समान भ्रातृत्व की भावना का निर्माण करें जो धर्म, भाषा और प्रदेश या वर्ग पर आधारित सभी भेदभाव से परे हों, ऐसी प्रथाओं का त्याग करें जो स्त्रियों के सम्मान के विरूद्ध हैं;

(च) हमारी सामासिक संस्कृति की गौरवशाली परंपरा का महत्व समझें और उसका परिरक्षण करें;

(छ) प्राकृतिक पर्यावरण की जिसके अंतर्गत वन, झील, नदी, और वन्य जीव हैं, रक्षा करें और उसका संवर्धन करें तथा प्राणि मात्र के प्रति दयाभाव रखें;

(ज) वैज्ञानिक दृष्टिकोण, मानववाद और ज्ञानार्जन तथा सुधार की भावना का विकास करें;

(झ) सार्वजनिक संपत्ति को सुरक्षित रखें और हिंसा से दूर रहें;

(ञ) व्यक्तिगत और सामूहिक गतिविधियों के सभी क्षेत्रों में उत्कर्ष की ओर बढ़ने का सतत प्रयास करें जिससे राष्ट्र निरंतर बढ़ते हुए प्रयत्न और उपलब्धि की नई ऊंचाईयों को छू लें।

# THE CONSTITUTION OF INDIA

**PREAMBLE**

**WE, THE PEOPLE OF INDIA,** having solemnly resolved to constitute India into a[1] **[SOVEREIGN SOCIALIST SECULAR DEMOCRATIC REPUBLIC]** and to secure to all citizens :

**JUSTICE,** social, economic and political;

**LIBERTY** of thought, expression, belief, faith and worship;

**EQUALITY** of status and of opportunity; and to promote among them all

**FRATERNITY** assuring the dignity of the individual and the [2] [unity and integrity of the Nation];

**IN OUR CONSTITUENT ASSEMBLY** this twenty-sixth day of November, 1949, do **HEREBY ADOPT, ENACT AND GIVE TO OURSELVES THIS CONSTITUTION.**

1. Subs, by the Constitution (Forty-Second Amendment) Act. 1976, sec. 2, for "Sovereign Democratic Republic" (w.e.f. 3.1.1977)
2. Subs, by the Constitution (Forty-Second Amendment) Act. 1976, sec. 2, for "unity of the Nation" (w.e.f. 3.1.1977)

**Chapter IV A**

# FUNDAMENTAL DUTIES

**ARTICLE 51 A**

**Fundamental Duties -** It shall be the duty of every citizen of India-

(a) to abide the Constitution and respect its ideals and institutions, the National Flag and the National Anthem;

(b) to cherish and follow the noble ideals which inspired our national struggle for freedom;

(c) to uphold and protect the sovereignty, unity and integrity of India;

(d) to defend the country and render national service when called upon to do so;

(e) to promote harmony and the spirit of common brotherhood amongst all the people of India transcending religious, linguistic and regional or sectional diversities; to renounce practices derogatory to the dignity of women;

(f) to value and preserve the rich heritage of our composite culture;

(g) to protect and improve the natural environment including forests, lakes, rivers, wild life and to have compassion for living creatures;

(h) to develop the scientific temper, humanism and the spirit of inquiry and reform;

(i) to safeguard public property and to abjure violence;

(j) to strive towards excellence in all spheres of individual and collective activity so that the nation constantly rises to higher levels of endeavour and achievement.








गीताञ्जलि



P-45

P-48

P-54